KERALA READER

SANSKRIT

केरलपाठावली

संस्कृतम्

# HIGHER SECONDARY COURSE

## STANDARD - XI

## एकादश:वर्ग:

# OPTIONAL SAHITHYA

## उच्चतरविद्यालयानां कृते

## ऐच्छिकम् - साहित्यम्

Government of Kerala
DEPARTMENT OF EDUCATION

State Council of Educational Research and Training (SCERT), Kerala

2016

## राष्ट्रगीतम्

जनगण मन अधिनायक जय हे,
भारत भाग्य विधाता।
पंजाब सिंध गुजरात मराठा,
द्राविड़ उत्कल बंगा।
विंध्य हिमाचल यमुना गंगा,
उच्छल जलधि तरंगा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे,
गाहे तव जय-गाथा।
जनगण मंगलदायक जय हे,
भारत भाग्य विधाता।
जय हे, जय हे, जय हे,
जय जय जय, जय हे ।

## प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

*Prepared by* :

**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram 695012, Kerala
*Website* : www.scertkerala.gov.in *e-mail* : scertkerala@gmail.com
Phone : 0471 - 2341883, Fax : 0471 - 2341869
Typesetting and Layout : SCERT
© Department of Education, Government of Kerala

*To be printed in quality paper - 80gsm map litho (snow-white)*

# प्रास्ताविकम् ।

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषदा उच्चतरविद्यालयानां कृते विरचितं संस्कृतसाहित्यं पाठपुस्तकम् इदम्। राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषदा निर्दिष्टां पाठ्यपद्धतिम् अनुसृत्य राज्यस्तरीयं साहचर्यं च परिचिन्त्य एव पाठभागाः निर्द्धारिताः। सुभाषितं, रूपकं, कथा, इतिहासः, उपन्यासः, साहित्यविनोदः च प्रथमवर्षे प्रस्तूयन्ते। वृत्तमलङ्कारञ्च सविस्तरपठनाय निवेशितः। पाठ्यांशानां सम्यगवबोधनार्थमावश्यकं लघुव्याख्यानमप्यत्रायोजितम्। पठनोपकारकाणि अभ्यासकार्याणि च पाठभागानाम् अन्त एव दत्तानि। अध्यापकैः अभ्यासकार्यान्तराण्यपि यथायथं विरच्यन्ताम्। राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषदा समायोजितायां तत्तद्विषये प्रवीणानां महाविद्यालयाध्यापकानामन्येषां शिक्षाशास्त्रज्ञानां च नेतृत्वे प्रवृत्तायां कर्मशालायामेव पुस्तकस्यास्य संकलनं कृतम्। पुस्तकस्यास्योपयोगितासंवर्धनानुगुणं निर्देशादिकम् अध्यापकैः यदि सूच्येत तर्हि भविष्यत्काले तस्योपयोगः क्रियेत।

पाठपुस्तकमिदमुद्दिष्टम् कार्यं निर्वोढुं प्रभवेदिति प्रतीक्षे।

**डॉ पि. ए. फातिमा,**
निदेशकः
राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्।
केरलाः।

## Textbook Development Team

1. ***N.K.Ramachandran**, (Rt.DEO), Wayanad*
2. ***Sankaranarayanan.A,** HSST (Sanskrit), Govt.Sanskrit HSS, Thripunithura*
3. ***Madhu.N,** HSST (Sanskrit), KVHSS, Muthukulam, Alappuzha*
4. ***Swayamprabha,** HSST (Sanskrit) SNHSS, Irinjalakkuda, Thrissur*
5. ***Anandakumari.P.N**, HSST (Sanskrit), BSS HSS, Kollangode, Palakkad*
6. ***Krishnan.O**, HSST (Sanskrit), Kunnamangalam HSS, Kozhikode*
7. ***Narayanan**, HSST (Sanskrit), Govt.Model HSS, Kozhikkode*
8. ***Krishnakumari.S**, HSST (Sanskrit), K.V Sanskrit HSS, Muthukulam, Alappuzha*
9. ***Nandakishor.R**, HSST (Sanskrit), Aleemul Islam HSS, Padoor, Thrissur*
10. ***Dr. Abhilash.J**, HSST (Sanskrit), MKMHSS, Piravom, Ernakulam*
11. ***Saji kumar A. V.**, GHSS Karupadanna, Thrissur*

## Experts

1. ***Dr.R.Vasudevan potti**, Dean, Vedantha (Rtd), Sree Sankaracharya University, Kalady*
2. ***Prof.Muraleedharan Nair.M** (Rtd), Head of Department of Sahithya, Govt.Sanskrit College, Thiruvananthapuram*

## Academic Co-ordinators

1. ***Dr.T.Kerala Sreemathi** (Rtd), Research officer, SCERT, Thiruvananthapuram.*
2. ***Dr.Rekha.R.Nair,** Research officer, SCERT, Thiruvananthapuram*

**State Council of Educational Research and Training (SCERT),**
Vidhyabhavan, Poojappura, Thiruvananthapuram-695 012

# विषयानुक्रमणिका ।


| | पाठस्य नाम | व्यवहारः | पुटसंख्या |
|---|---|---|---|
| १. | आलोचनामृताः वाण्यः (सुभाषितानि) | पद्यम् | ८-१८ |
| २. | बुद्धिरेव गरीयसी (पञ्चतन्त्रम्) | कथा | १९-२७ |
| ३. | सीतादर्शनम् (रामायणम्) | इतिहासम् | २८-४७ |
| ४. | संस्कृतोपासकाः | उपन्यासः | ४८-५७ |
| ५. | दुष्टान्निलीयते पुत्रम् (बालचरितम्) | रूपकम् | ५८-६९ |
| ६. | विनोदकणिकाः (चाटुश्लोकाः) | साहित्यविनोदम् | ७०-७७ |
| ७. | मन्त्रोक्तिः (श्रीकृष्णविलासम्) | महाकाव्यम् | ७८-१०७ |
| ८. | अलङ्काराः । | | १०८-११८ |
| ९. | वृत्तम् । | | ११९-१२८ |

सह नाववतु।

सह नौ भुनक्तु।

सह वीर्यं करवावहै।

तेजस्वि नावधीतमस्तु।

मा विद्विषावहै।

# आलोचनामृताः वाण्यः।

**भाषासु मधुरा मुख्या**

**दिव्या गीर्वाणभारती।**

**तस्यां हि काव्यं मधुरम्**

**तत्रापि च सुभाषितम्।।**

संस्कृतसाहित्यवृक्षस्य पल्लवानीव राजन्ते सुभाषितानि। नीतिज्ञैः नानाशास्त्रविशारदैः तत्वदर्शिभिः अस्माकं पूर्वसूरिभिः कथितानीमानि तु कालातिवर्तीनि।

सुभाषितसाहित्यप्रस्थाने प्रथमगणनीयाः भवन्ति भर्तृहरिः चाणक्यः विष्णुशर्मादयः। तेषां अमृतनिष्यन्दिन्यः वाण्यः शिलालिखितानीव वर्तन्ते। तथा भासकालिदासादीनां काव्यनाटकेष्वपि वर्तन्ते बहूनि सुभाषितानि। पाठेऽस्मिन् पञ्चतन्त्रात्, नीतिशतकात्, मालविकाग्निमित्रात् हितोपदेशात् स्वप्नवासवदत्ताच्च दश सुभाषितानि समाकलितानि।

१

# आलोचनामृताः वाण्यः।

1. **पापान्निवारयति योजयते हिताय**
**गुह्यं निगूहति गुणान् प्रकटीकरोति।**
**आपद्गतं च न जहाति ददाति काले**
**सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।।** (नीतिशतकम्)

सन्मित्राणां लक्षणं किम्?

**पदच्छेदः** - पापात् निवारयति - पापान्निवारयति।

**अन्वयः** - सन्तः सन्मित्रलक्षणम् इदं प्रवदन्ति (यत्) सन्मित्रं पापात् निवारयति, हिताय योजयते, गुह्यं निगूहति, गुणान् प्रकटीकरोति आपद्गतं न जहाति, काले ददाति च।

**व्याख्या** - प्रवदन्ति (प्र + वद व्यक्तायां वाचि लट् परस्मैपदि प्र. पु. ब. व.) कथयन्ति। निवारयति - वारयति। हिताय - हितं कर्तुम्। योजयते - संयोजयति। गुह्यं - आच्छादनीयं (गोप्यम्)। निगूहति - आच्छादयति। गुणान् - व्यक्तित्वविशेषान्। प्रकटीकरोति - प्रकाशयति। आपद्गतं - आपदि पतितम्। न जहाति - नत्यजति। काले - उचिते समये (अवसरे)। ददाति - साहाय्यं तनोति।

**सारांशः** - सज्जनाः सन्मित्रलक्षणम् एवं वदन्ति। सन्मित्रं दुष्कृत्येभ्यः वारयति, सत्कर्मणि नियोजयति। मित्रस्य दुर्गुणान् आच्छाद्य सत्स्वभावान् प्रकटयति, आपदि पतितं मित्रं न त्यजति उचिते समये साहाय्यं तनोति च।

**धातुपरिचयः**

निगूहति - नि + गुह् संवरणे लट् पर. प्र. पु. ए. व.।
जहाति - ओहाक् त्यागे लट् पर. प्र. पु. ए. व.।
ददाति - डुदाञ् दाने लट् पर. प्र. पु. ए. व.।

**2. शिक्षा क्षयं गच्छति कालपर्ययात्**
**सुबद्धमूला निपतन्ति पादपाः।**
**जलं जलस्थानगतं च शुष्यति**
**हुतं च दत्तं च तथैव तिष्ठति।।** (कर्णभारः)

किं शाश्वतं तिष्ठति ?

**पदच्छेदः** - तथा + एव- तथैव।

**अन्वयः** - शिक्षा कालपर्ययात् क्षयं गच्छति। पादपाः सुबद्धमूलाः (अपि) निपतन्ति। जलस्थानगतं जलं च शुष्यति। हुतं च दत्तं च तथा एव तिष्ठति।

**व्याख्या** - शिक्षा - विद्या। कालपर्ययात् - कालस्य परिवर्तनात्। क्षयं गच्छति - नश्यति। सुबद्धमूलाः - रूढमूलाः। पादपाः - वृक्षाः। निपतन्ति - पतन्ति। जलस्थानगतं - जलस्रोतस्थितम्। शुष्यति - शुष्कं भवति। हुतं - होमाग्नौ अर्पितम्। दत्तं - प्रदत्तम्। तथैव तिष्ठति - सर्वदा तिष्ठति।

**सारांशः** - काले गच्छति सति अधीता विद्या विस्मृता भवेत्। रूढमूलाः वृक्षाः अपि नश्यन्ति। जलस्रोतसि विद्यमानं जलं कालेन शुष्यति। यागस्य दानस्य च फलं न्यूनाधिकभावं विना सर्वदा तिष्ठति।

**3. अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।**
**तृणैर्गुणत्वमापन्नैः बध्यन्ते मत्तदन्तिनः।।** (हितोपदेशः)

**पदच्छेदः** - तृणैः गुणत्वम् आपन्नैः- तृणैर्गुणत्वमापन्नैः।

**अन्वयः** - वस्तूनाम् अल्पानाम् अपि संहतिः कार्यसाधिका (भवति)। गुणत्वम् आपन्नैः तृणैः मत्तदन्तिनः बध्यन्ते।

**व्याख्या** - अल्पानां - निस्साराणां। संहतिः - समूहः। कार्यसाधिका - कार्यनिर्वाहाय योग्या। गुणत्वं - रज्जुत्वम्। आपन्नैः- प्राप्तैः। तृणैः, मत्तदन्तिनः - मदगजाः। बध्यन्ते - बद्धाः क्रियन्ते।

**सारांशः** - निस्साराणां वस्तूनां समूहः कार्यसाधने समर्थो भवति। रज्जुरूपतां प्राप्तैः तृणैः मत्तगजाः अपि बद्धुं शक्यन्ते।

**धातुपरिचयः** - निपतन्ति - नि पूर्वक पत्लृ गतौ प प प्र पु ब व।

**4** **ज्वलति चलितेन्धनोऽग्निः**
**विप्रकृतः पन्नगः फणां कुरुते।**
**प्रायः स्वं महिमानं**
**कोपात् प्रतिपद्यते हि जन्तुः।।** (शाकुन्तलम्)

स्वं महिमानं कदा प्रतिपद्यते ?

**पदच्छेदः** - चलितेन्धनः + अग्निः-चलितेन्धनोऽग्निः।

**अन्वयः** - चलितेन्धनःअग्निः ज्वलति। पन्नगः विप्रकृतः फणां कुरुते। हि जन्तुः कोपात् स्वं महिमानं प्रायः प्रतिपद्यते।

**व्याख्या** - इन्धनं - काष्ठम्। पन्नगः - सर्पः। विप्रकृतः - अभिभूतः। फणां कुरुते - फणं प्रसारयति। हि - तथाहि। जन्तुः - प्राणी। कोपात् - रोषात्। स्वं महिमानं - स्वकीयं महत्वम्। प्रायः - प्रायेण। प्रतिपद्यते - प्राप्नोति (स्वीकरोति)।

**सारांशः** - काष्ठेषु चलितेषु तदाश्रयः अग्निः ज्वलति। अभिभूतः सर्पः फणं प्रसारयति। तथाहि प्राणी (जन्तुः) कोपात् हेतोः स्वकीयं स्वभावं प्रकटीकरोति।

**धातुपरिचयः** - प्रतिपद्यते - प्रतिपूर्वक पत्लृ गतौ धातोः आ प प्र पु ए व।

**5. वरमेको गुणी पुत्रो न च मूर्खशतान्यपि।**
**एकश्चन्द्रस्तमो हन्ति न तु तारागणः क्वचित्।।**
(चाणक्यनीतिः)

संहतिः कीदृशी भवति ?

**पदच्छेदः** - मूर्खशतानि + अपि मूर्खशतान्यपि। एकः + चन्द्रः + तमः + हन्ति।
एकश्चन्द्रस्तमो हन्ति।

**अन्वयः** - गुणी पुत्रः एकः अपि वरम्। मूर्खशतानि अपि न च (वरम्)। एकः चन्द्रः तमः हन्ति तारागणः तु क्वचित् न (हन्ति)।

**व्याख्या** - गुणी - गुणवान् (सद्गुणसम्पन्नः)। पुत्रः - सुतः। वरं - ईषत् प्रियम्। मूर्खशतानि मूर्खाणां शतानि, मूर्खः - कार्याकार्यविवेकशून्यः, तमः - अन्धकारः, हन्ति - नाशयति। तारागणः - नक्षत्रसमूहः। क्वचित् - कदाचित्, न हन्ति - न नाशयति।

**सारांशः** - सद्गुणसम्पन्नः एकः अपि पुत्रः ईषत् प्रियम्। अनेके मूढाः पुत्राः तु न वरम्। रात्रौ एकः चन्द्रः एव अन्धकारं नाशयति। तारागणः अन्धकारं कदाचित् अपि न नाशयति इत्यर्थः।

**विग्रहः** - (प्रशस्ताः) गुणाः अस्य सन्ति इति गुणी।

**6. पुराणमित्येव न साधु सर्वं**
**न चापि काव्यं नवमित्यवद्यम्।**
**सन्तः परीक्ष्यान्यतरद् भजन्ते**
**मूढः परप्रत्ययनेयबुद्धिः।।** (मालविकाग्निमित्रम्)

कार्याणि सन्तः कथम् अवगच्छेत् ?

**पदच्छेदः** - इति + एव - इत्येव। च + अपि - चापि। इति + अवद्यम् - इत्यवद्यम्। परीक्ष्य + अन्यतरत्- परीक्ष्यान्यतरत्।

**अन्वयः** - पुराणम् इति एव सर्वं न साधु। काव्यं नवम् इति अपि न च अवद्यम्। सन्तः परीक्ष्य अन्यतरद् भजन्ते। मूढः परप्रत्ययनेयबुद्धिः भवति।

**व्याख्या** - साधु - समीचीनम्। अवद्यम् - निन्द्यम्। सन्तः - सज्जनाः। परीक्ष्य - परीक्षां कृत्वा (विवेचनं कृत्वा) अन्यतरत् - द्वयोरेकम्। परेषां प्रत्ययेन (ज्ञानेन) नेतुं शक्या बुद्धिः यस्य सः। मूढः - विवेकशून्यः।

**सारांशः** - पुरातनम् इति कारणेन काव्यं न रुचिरम्। नवम् इति कारणेन न अपि निन्द्यम्। सज्जनाः सम्यक् परीक्ष्य पुराणनवयोर्मध्ये विविच्य एव एकं स्वीकुर्वन्ति। मूढास्तु परैः नीयमानया बुद्ध्या जीवनं कुर्वन्ति।

7. **विपदि धैर्यमथाभ्युदये क्षमा**
**सदसि वाक्पटुता युधि विक्रमः।**
**यशसि चाभिरुचिर्व्यसनं श्रुतौ**
**प्रकृतिसिद्धमिदं हि महात्मनाम्।।** (हितोपदेशः)

**महात्मनां लक्षणम् किम्?**

**पदच्छेदः** - अथ + अभ्युदये - अथाभ्युदये।
च + अभिरुचिः + व्यसनम् - चाभिरुचिर्व्यसनम्।

**अन्वयः** - विपदि धैर्यम्, अभ्युदये क्षमा, सदसि वाक्पटुता, युधि विक्रमः, यशसि अभिरुचिः, श्रुतौ व्यसनं च इदं महात्मनां प्रकृतिसिद्धं हि।

**व्याख्या** - विपदि - आपत्काले। धैर्यं - धीरता। अभ्युदये - उत्कर्षे। क्षमा - नम्रता। सदसि - सभायां। वाक्पटुता - वाक्चातुर्यं। युधि - युद्धे (रणे)। विक्रमः - पराक्रमः। यशसि - कीर्तौ। अभिरुचिः - तात्पर्यं। श्रुतौ - शास्त्रज्ञाने। व्यसनं - आसक्तिः। इदं - एतत् सर्वं। महात्मनां - सज्जनानां। प्रकृतिसिद्धं हि - स्वभावसिद्धं खलु।

**सारांशः** - आपत्काले धीरता, अभ्युन्नतौ स्थिरता, सभायां वाग्मिता, युद्धे पराक्रमः, सत्कीर्तौ तात्पर्यं, शास्त्रविषयेषु आसक्तिः, एते सज्जनानां स्वाभाविकाः गुणाः भवन्ति।

**8. विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन।**
**स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।।** (चाणक्यनीतिः)

**पदच्छेदः** - न + एव - नैव।

**अन्वयः** - विद्वत्वं च नृपत्वं च कदाचन नैव तुल्यम्। राजा स्वदेशे पूज्यते। विद्वान् सर्वत्र पूज्यते।

**व्याख्या** - कदाचन - कदापि। विद्वत्वं - पाण्डित्यं। नृपत्वं - राजत्वं। तुल्यं - समं। स्वदेशे - स्वराज्ये। पूज्यते - बहुमन्यते। विद्वान् - पण्डितः। विदुषो भावः विद्वत्त्वम्। नृपस्य भावः नृपत्वम्।

**सारांशः** - पाण्डित्यं प्रभुत्वं च कदापि तुल्यं न। राजा स्वराज्ये एव पूज्यते। पण्डितः न केवलं स्वराज्ये किन्तु लोके सर्वत्र पूज्यते।

**9. गुणानां वा विशालानां सत्काराणां च नित्यशः।**
**कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः।।** (स्वप्नवासवदत्तम्)

**पदच्छेदः** - विज्ञातारः + तु - विज्ञातारस्तु।

**अन्वयः** - लोके विशालानां गुणानां सत्काराणां च कर्तारः नित्यशः सुलभाः (तु) विज्ञातारः दुर्लभाः।

**व्याख्या** - लोके जगति। विशालानां महतां गुणानां - दयादाक्षिण्यादीनां। सत्काराणाम् - आदराणां। कर्तारः - प्रयोक्तारः। नित्यशः - सदा। सुलभाः - सुप्रापाः। तु - परन्तु। विज्ञातारः - ज्ञातारः। दुर्लभाः - दुःखेन लब्धुं योग्याः।

**सारांशः** - लोके महतां गुणयुक्तानां जनानाम् आदरणार्थं जनाः प्रभवन्ति। किन्तु तेषां ज्ञातारः नैव सुलभाः। लोके उत्तमगुणानां, समादरणानां कर्त्तारः सुलभाः सन्ति। किन्तु तेषां महत्त्वं केचन एव जानन्ति।

**10. कः कं शक्तो रक्षितुं मृत्युकाले**
**रज्जुच्छेदे के घटं धारयन्ति।**
**एवं लोकः तुल्यधर्मा वनानां**
**काले काले छिद्यते रुह्यते च।।** (स्वप्नवासवदत्तम्)

**पदच्छेदः** - शक्तः + रक्षितुम् - शक्तो रक्षितुम्

**अन्वयः** - मृत्युकाले कः कं रक्षितुं शक्तः। रज्जुच्छेदे के घटं धारयन्ति। एवं लोकः वनानां तुल्यधर्मा। काले काले छिद्यते रुह्यते च।

**व्याख्या** - मृत्युकाले - मरणसमये। कः - जनः, कं - जनम्। रक्षितुं - कः त्रातुं शक्तः - समर्थः भवति न कोऽपीत्यर्थः। रज्जुः - दाम। घटं - कलशम् के धारयन्ति ग्रहीतुं समर्थाः। एवं - इत्थं। लोकः - जनाः। वनानां - वृक्षाणां। तुल्यधर्मा - समान स्वभावः भवति। काले काले - यथाकालं छिद्यते - नश्यति, रुह्यते - वर्धते च अङ्कुरितं भवति च।

**सारांशः** - मरणसमये केनापि कोऽपि रक्षितुं न शक्यते। यदा रज्जुः छिन्ना भवति तदा तत्र बद्धं घटं ग्रहीतुं कोऽपि न समर्थः भवति। लोकः तु वनानां तुल्यधर्मा दृश्यते। वने वृक्षाः स्वयं नश्यन्ति स्वयम् अङ्कुरिताश्च भवन्ति।

**प्रयोगविशेषः** - समानधर्मा - समानः धर्मः यस्य सः। समानधर्मा अत्र धर्मादनिच् केवलादिति सूत्रेण अनिचि समासान्ते धर्मशब्दे धर्मन् इति नकारान्ते भवति।

## पठनप्रवर्तनानि।

❖ **सुभाषितानि सङ्घशः एकैकशश्च कक्ष्यायाम् आलपतु।**

**श्रद्धेयाः अंशाः।**

- नूतनपदचयनं अर्थनिर्धारणञ्च।
- सन्धियुक्तपदचयनं विश्लेषणञ्च।
- समस्तपदचयनं विग्रहवाक्यलेखनं च।

- स्वकीये निघण्डौ यथाविधि सन्निवेशनम्।
- श्लोकस्य आलपनम्।

❖ **एकं सुभाषितम् स्वीकृत्य सुभाषितोक्तानाम् आशयानां स्वजीवने कीदृशः प्रभावः इति आस्वादनटीकां रचयतु।चर्चां कृत्वा टिप्पणीं लिखतु।**

**श्रद्धेयाः अंशाः।**

- वाचनेन आशयग्रहणम्।
- चर्चा।
- आस्वादनम्।
- वैयक्तिकरीत्या क्रोडीकरणम्।
- लेखनम्।

❖ **अन्यानि सुभाषितानि सञ्चित्य स्वकीयसुभाषितपुस्तके निवेशयतु। (वाचनेन आशयं ज्ञात्वा लेखनम्।)**

**श्रद्धेयाः अंशाः।**

- सुभाषितानां सञ्चयनम्।
- कक्ष्यायां चर्चा।
- आशयक्रोडीकरणम्।
- लेखनम्।
- सुभाषितपुस्तके निवेशनम्।

❖ **क विभागे दत्तानाम् आशयानां समानार्थकश्लोकपादान् ख विभागात् चिनुत।**

| **क विभागः** | **ख विभागः** |
|---|---|
| 1. राजा स्वराज्ये एव पूज्यते। किन्तु पण्डितः सर्वत्र। | कोपात् प्रतिपद्यते हि जन्तुः। |
| 2. सद्गुणसम्पन्नः एकः पुत्रः एव श्रेयान् न अनेके मूढाः पुत्राः। | मूढः परप्रत्ययनेयबुद्धिः। |
| 3. विवेकिनः तु अन्यैः नीयमानया बुद्ध्या जीवनं कुर्वन्ति। | हुतं च दत्तं च तथैव तिष्ठति। |
| 4. प्राणी यदा केनापि कारणेन क्रुद्धो भवति तदा स्वकीयं स्वभावं प्रकटीकरोति। | स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते। |
| 5. यागस्य दानस्य च फलं सर्वदा तिष्ठति। | वरमेको गुणी पुत्रः न च मूर्खशतान्यपि। |

❖ **प्रदत्तानां श्लोकानां अन्वयं लिखत।**

♣ पुराणमित्येव न साधु सर्वम् न चापि काव्यम् नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः।।

♣ विद्वत्वञ्च नृपत्वञ्च नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।।

**श्रद्धेयाः अंशाः।**

- पाठानुवाचनम्।
- संघे चर्चा।
- आकाङ्क्षारीत्या अन्वयलेखनम्।

## पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम्* | क्लेशनिर्देशः |
|---|---|---|---|---|
| 1. | काव्यालपनम्। | | | |
| 2. | आस्वादनटीकारचना। | | | |
| 3. | सुभाषितचयनम्। | | | |
| 4. | समानार्थकश्लोकपादचयनम् | | | |
| 5. | अन्वयलेखनम् | | | |

*भागिकतया कृतं चेत् कथं पूर्णं कृतम् इति संस्थया सूचयतु।

१. अध्यापकसाहाय्येन।

२. ग्रन्थसाहाय्येन।

३. छात्राणां साहाय्येन।

४. इतरेषां साहाय्येन।

# बुद्धिरेव गरीयसी।

शिशुसाहित्ये तथा गद्यसाहित्ये च प्रथमं स्थानमस्ति पञ्चतन्त्रकथायाः। आबालवृद्धं जनानामोदयन् ग्रन्थतल्लजोऽयं साहित्यमातुः मकुटायमानो विराजते। राज्यनीतिशास्त्रे अनिपुणान् राजकुमारान् तदवबोधयितुं सरलाभिः कथाभिः रचितमिदमिति ग्रन्थोद्घाटनकथायां वदति।

कौटिल्यस्य अर्थशास्त्रं कामन्दकस्य नीतिसारं च प्रथितौ नीतीशास्त्रग्रन्थौ भवतः । अन्ये च बहवः नीतिशास्त्रग्रन्थाः च अत्र भारते प्रचलिताः आसन्। तेषु प्रतिपादितान् विषयान् अतिसरलं सुगमञ्च बालान् अवबोधयितुं पण्डितेन विष्णुशर्मणा पशुपक्षिकथारूपेण पञ्चतन्त्रमिदं ग्रथितम्।

पञ्चतन्त्रस्य भाषा सरला। अतः सुगमा एव। तत्र तन्त्राणि पञ्चधा विभज्यन्ते।

१. मित्रभेदः।

२. मित्रसम्प्राप्तिः।

३. काकोलूकीयम्।

४. लब्धप्रणाशः।

५. अपरीक्षितकारकम्।

२

# बुद्धिरेव गरीयसी।

## सिंहकारकमूर्खब्राह्मणकथा

कस्मिंश्चिद् अधिष्ठाने चत्वारो ब्राह्मणपुत्राः परस्परं मित्रभावमुपगताः वसन्ति स्म। तेषां त्रयः शास्त्रपारंगताः परन्तु प्रायोगिकबुद्धिरहिताः। एकस्तु बुद्धिमान् केवलं शास्त्रपराङ्मुखः। अथ तैः कदाचित् मित्रैः मन्त्रितं "को गुणो विद्यायाः येन देशान्तरं गत्वा भूपतीन् परितोष्य अर्थोपार्जनं न क्रियते? तत् पूर्वदेशं गच्छाम इति।"

तथानुष्ठिते किञ्चित्मार्गं गत्वा तेषां ज्येष्ठः प्राह - अहो! अस्माकमेकः चतुर्थो मूढः केवलं बुद्धिमान्। विद्यां विना केवलबुद्ध्या राजप्रतिग्रहः न लभ्यते। तन्न अस्मै स्वोपार्जितं दास्यामि। तद्गच्छतु गृहम्। ततो द्वितीयेन अभिहितं - भोः सुबुद्धे! गच्छ त्वं स्वगृहे, यतः त्वं विद्यावान् न। ततः तृतीयेन अभिहितम् - अहो न युज्यते एवं कर्तुं, यतो वयं बाल्यात् प्रभृति एकत्र क्रीडिताः, तत् आगच्छतु महानुभावः अस्मदुपार्जितवित्तस्य समभागी भविष्यतीति।

तथा च,

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानान्तु वसुधैव कुटुम्बकम्।।

तत् आगच्छतु एषोऽपि इति। तथा अनुष्ठिते तैः मार्गाश्रितैः अटव्यां कानिचित् अस्थीनि दृष्टानि। ततश्च एकेन अभिहितम् - अहो अद्य विद्याप्रत्ययः क्रियते, कतिचिदेतानि मृतसत्वस्य अस्थीनि तिष्ठन्ति तत् विद्याप्रभावेण जीवसहितं कुर्मः। अहम् अस्थिसञ्चयं करोमि।

ततश्च तेन औत्सुक्यात् मृतसत्वस्य अस्थिसञ्चयः कृतः। द्वितीयेन चर्ममांसरुधिरं संयोजितम्। तृतीयोऽपि यावत् जीवं सञ्चारयति तावत् सुबुद्धिना निषिद्धः, - "भोः तिष्ठतु भवान्! एष सिंहो निष्पाद्यते।"

यदि एनं सजीवं करिष्यति ततः सर्वानपि व्यापादयिष्यति इति तेन अभिहितः। ततस्तृतीयः आह - "धिङ् मूर्ख! नाहं विद्यां विफलां करोमि। ततः तेनाभिहितं -"तर्हि प्रतीक्षस्व क्षणं यावदहं वृक्षमारोहामि"। तथानुष्ठिते यावत् सजीवः कृतः तावत् ते त्रयोऽपि सिंहेन व्यापादिताः, स च पुनः वृक्षात् अवतीर्य गृहं गतः। तथा च उक्तम्-

"वरं बुद्धिर्न सा विद्या, विद्याया बुद्धिरुत्तमा।
बुद्धिहीना विनश्यन्ति, यथा ते सिंहकारकाः।।"

## पदच्छेदः

| | | |
|---|---|---|
| तथाऽनुष्ठिते | - | तथा + अनुष्ठिते। |
| किञ्चिन्मार्गम् | - | किञ्चित् + मार्गम्। |
| तन्न | - | तत् + न। |
| यतो वयं | - | यतः + वयम्। |
| भविष्यतीति | - | भविष्यति + इति। |
| एकस्तु | - | एकः + तु। |

## विग्रहः

| | | |
|---|---|---|
| भूपतीन् | - | भुवः पतिः तान्। |
| अर्थोपार्जनम् | - | अर्थस्य उपार्जनम्। धनसम्पादनम् इत्यर्थः। |
| पूर्वदेशं | - | पूर्वश्च असौ देशश्च तम्। |
| देशान्तरं | - | अन्यो देशः। |

| | | |
|---|---|---|
| ज्येष्ठः | - | अत्यन्तं वृद्धः। |
| स्वोपार्जितम् | - | स्वेन उपार्जितम्। स्वयं सम्पादितम् इत्यर्थः। |
| शास्त्रपारंगताः | - | शास्त्रेषु पारंगताः। |
| शास्त्रपराङ्मुखः | - | शास्त्रात् पराक् मुखं यस्य सः। शास्त्रानभिज्ञः इत्यर्थः। |
| राजप्रतिग्रहः | - | राज्ञः प्रतिग्रहः। राज्ञः दानस्वीकारः। |
| चर्ममांसरुधिरम् | - | चर्मञ्च मांसञ्च रुधिरञ्च तत्। |
| उदारचरितानाम् | - | उदारं चरितं येषां ते। तेषाम् उदारचरितानाम्। |

## पदार्थः

| | | |
|---|---|---|
| गच्छतु | - | यातु। |
| अभिहितं | - | उक्तम्। |
| कर्तुम् | - | डुकृञ् धातुः तुमुन्नन्ताव्ययम्। |
| बाल्यात् प्रभृति | - | बाल्यकालात् आरभ्य। (प्रभृति आरभ्य शब्दयोगे पञ्चमी।) |
| अस्मदुपार्जितवित्तस्य | - | अस्माभिः सम्पादितस्य धनस्य। |
| समभागी | - | समानभागी। तुल्यभागी इत्यर्थः। |
| अधिष्ठाने | - | स्थाने। ग्रामे इत्यर्थः। |
| अटव्यां | - | कानने। |
| विद्याप्रत्ययः | - | विद्यायां विश्वासः। |
| मार्गाश्रितैः | - | अध्वगामिभिः, मार्गे गच्छद्भिः। |

अस्थिसञ्चयम् - अस्थीनां संयोजनम्।

औत्सुक्यात् - आकांक्षया।

संयोजितम् - सम्बद्धीकृतम्। मन्त्रशक्त्या चर्मादियुक्तं कृतमिति आशयः।

निष्पाद्यते - सृज्यते।

सजीवं - जीवसहितम्।(क्रियाविशेषणम्)

व्यापादयिष्यति - हनिष्यति।

## धातुपरिचयः

परितोष्य - परि + तुष् + णिच् + ल्यप्।

प्राह - ब्रूते।

- *प्र पूर्वक ब्रूञ् (व्यक्तायां वाचि) इति धातोः ब्रुवः पञ्चानामादित आहो ब्रुवः इति आहादेशः।*

*लट् परस्मैपदि प्रथमपुरुष एकवचनम्।*

*आह आहतुः आहुः।*

*आत्थ आहथुः ब्रूथ*

*ब्रवीमि ब्रूवः ब्रूमः।*

भविष्यति - भू सत्तायाम् धातु परस्मैपदि लृट्। प्र. पु. ए. व.

भविष्यति भविष्यतः भविष्यन्ति।

लभ्यते - लभ लाभे धातोः आत्मनेपदि कर्मणि लट्।

लभ्यते लभ्येते लभ्यन्ते।

गच्छामः - गम् गतौ धातु परस्मैपदि लट् उत्तमपुरुष बहुवचनम्।

| | | |
|---|---|---|
| | | गच्छामि गच्छावः गच्छामः। |
| | | गच्छति इति लट्। |
| दास्यामि | - | दानं करिष्यामि। डुदाञ् दाने धातोः लृट् परस्मैपदि उ. पु. ए. व.। |
| *वसन्ति स्म* | - | *स्म योगे भूतकालार्थः। अवसदित्यर्थः (लट्स्मे, पा. सूत्रम्)* |
| गत्वा | - | गम् + क्त्वा |
| क्रियते | - | डुकृञ् करणे धातोः कर्मणि लट् प्रथमपुरुषैकवचनम्। |
| प्रतीक्षस्व | - | प्रतीक्षां कुरु इत्यर्थः। (प्र पूर्व ईक्ष् दर्शने आ. प. लो. म, पु, ए. व.) |
| *विद्यां विना* | - | *विना शब्दयोगे द्वितीया, तृतीया पञ्चमी वा विभक्तिः।* |
| *अस्थिसञ्चयम्* | - | *अस्थिदधिसक्थ्यक्ष्णाम् अनङुदात्तः इति।* |
| *चर्ममांसरुधिरम्* | - | *"द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" इति प्राण्यङ्गत्वात् एकवद्भावः।* |

## श्लोकं - १

### वरं बुद्धिर्न...

अन्वयः - बुद्धिः वरं, सा विद्या न, बुद्धिः विद्यायाः उत्तमा। यथा ते सिंहाकारकाः तथा बुद्धिहीनाः विनश्यन्ति।

आशयः - विवेकसहिता बुद्धिः एव श्रेष्ठा, विद्याम् अपेक्ष्य बुद्धिः एव उत्तमा। बुद्धिहीनाः जनाः सिंहकारका इव विनाशं प्राप्नुवन्ति।

## श्लोकं - २

**अयं निजः....**

अन्वयः - अयं निजः परः वा इति लघुचेतसां गणना, उदारचरितानां तु वसुधा एव कुटुम्बकम् इति।

आशयः - अयं जनः आत्मीयः अनात्मीयः वा इति सङ्कुचितमनसां विचारः। उदारचरितानां तु सर्वा पृथिवी कुटुम्बरूपेण वर्तते इत्याशयः।

मृतसत्वस्य - विगतप्राणस्य जन्तोः।

जीवसहितं - प्राणसंयुक्तम्।

## कोशः

"अटव्यरण्यं विपिनं गहनं काननं वनम्"।

## पठनप्रवर्तनानि।

❖ **कथां पठित्वा कक्ष्यायाम् अवतारयतु।**

**श्रद्धेयाः अंशाः।**

- नूतनपदचयनम् अर्थलेखनम् च।
- संश्लिष्टपदचयनं सन्धिविश्लेषणं च।
- समस्तपदचयनं विग्रहलेखनं च।

❖ **सिंहकारककथां संगृह्य लिखत।**

**श्रद्धेयाः अंशाः।**

- वाचनम्।
- लघुवाक्यैः आशयक्रोडीकरणम्।
- लेखनम्।

❖ **विद्यामहात्म्यसूचकानां सुभाषितानां चयनं कुरुत।**

**श्रद्धेयाः अंशाः।**

- सुभाषितानां चयनम्
- चर्चा
- लेखनम्।

❖ **पाठभागं पठित्वा पञ्चतन्त्रकथा बालानां नीतिबोधनाय उपकरोति इति विषयम् अधिकृत्य कक्ष्यायां संगोष्ठीं चालयतु। टिप्पणीं च लिखत।**

**श्रद्धेयाः अंशाः।**

- पाठभागस्य वाचनम्।
- सङ्घे कथांशानां चर्चा।
- पञ्चतन्त्रान्तर्गतानां नीतिबोधकसम्बन्धीनाम् आशयानाम् समाहरणम्।
- आशयक्रोडीकरणम्।
- टिप्पणीलेखनम् अवतारणञ्च।

❖ **सिंहकारकमूर्खब्राह्मणकथां लघुसम्भाषणरूपेण परिवर्तयत।**

**श्रद्धेयाः अंशाः।**

- पाठ्यांशानां वाचनम्।
- आशयग्रहणम्।
- सम्भाषणरूपेण परिवर्तनम्।
- अवतारणम्।

**पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम्* | क्लेशनिर्देशः |
|---|---|---|---|---|
| 1. | कथावतारणं कृतम्। | | | |
| 2. | संगृह्य लिखिता। | | | |
| 3. | सुभाषितचयनं कृतम्। | | | |
| 4. | सङ्गोष्ठी चालिता। | | | |
| 5. | सम्भाषणरूपेण परिवर्तितम् | | | |

*भागिकतया कृतं चेत् कथं पूर्णं कृतम् इति संस्थया सूचयतु।

१. अध्यापकसाहाय्येन।

२. ग्रन्थसाहाय्येन।

३. छात्राणां साहाय्येन।

४. इतरेषां साहाय्येन।

# सीतादर्शनम् ।

शोकात् श्लोकत्वमापन्नं भवति आदिकाव्यम्। क्रौञ्चमिथुनादेकं हतम् इतरां रुदन्तीं च दृष्ट्वा यः शोकः वाल्मीकेः मनसि अजायत, स एव आदिकाव्यस्य बीजः।

आदिकाव्ये अर्थेन भावेन च सुन्दरतरं भवति सुन्दरकाण्डान्तर्गतः हनूमत्सीतासमागमः। पाठेऽस्मिन् दृश्यमाना सीता एकाकिनी निरालम्बा आधुनिके समाजेऽपि सदा दुःखिता पीडिता च अस्माकं पुरतो वर्तते। स्त्रीणां संरक्षणम् अस्माकं प्रथमं कर्तव्यमिति सूचयत्ययं काव्यांशः।

३

# सीतादर्शनम्

## हनूमत्सीतासमागमः।

*(रामायणम् सुन्दरकाण्डम्)*

श्रीमता वाल्मीकिना विरचितं 'रामायणम्' आदिकाव्यम् इति गीयते। वाल्मीकिश्च आदिकविः। तमसानदीतीरे क्रौञ्चमिथुनात् एकं व्याधः अवधीत्। तद्दृष्ट्वा वाल्मीकेः मुखात् सहसा -

मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वती समाः।

यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥

इति श्लोकः निर्गलितः। सः शोक एव श्लोकताम् उपगतः। वाल्मीकेः मुखात् निर्गलितं श्लोकं श्रुत्वा ब्रह्मा एव रामायणकथा त्वया रचनीया इत्यादिदेश। तदनुसारं रचितं वाल्मीकिरामायणम्। तत्र बालकाण्डम्, अयोध्याकाण्डम्, आरण्यकाण्डं, किष्किन्धाकाण्डं, सुन्दरकाण्डं, युद्धकाण्डम् इति षट्काण्डानि प्रथितानि। काव्यस्य रमणीयत्वात् दूतसम्बन्धितया च तस्य सुन्दरकाण्डम् इति व्यपदेशः समुचितः प्रतीयते।

दण्डकारण्ये उषितवती सीता दुरात्मना रावणेन अपहृता अभूत्। ताम् अन्विष्य हनूमान् लङ्कां प्रविश्य अशोकवनिकायां सीताम् अपश्यत्। तत्प्रकरणमेव अत्र समाहृतम्।

**कीदृशीं सीतामपश्यदित्याह श्लोकद्वयेन-**

**1. ततो मलिनसंवीतां राक्षसीभिः समावृताम्।**
**उपवासकृशां दीनां निश्वसन्तीं पुनः पुनः।।**

**पदच्छेदः** - ततः + मलिनसंवीतां - ततो मलिनसंवीताम्।

**पदार्थाः**

| | | |
|---|---|---|
| ततः | - | तदनन्तरं |
| मलिनसंवीतां | - | मलिनवस्त्रावृतां |
| राक्षसीभिः | - | निशाचरस्त्रीभिः |
| समावृताम् | - | आवृताम् |
| उपवासकृशां | - | निराहारव्रतेन क्षीणाम् |
| दीनां | - | दीनभावयुक्तां |
| निःश्वसन्तीं | - | दीर्घं श्वसन्तीम् |

**विग्रहः** - मलिनसंवीताम् - मलिनेन (वस्त्रादिना) संवीता, ताम्।

**अन्वयः** - ततः मलिनसंवीतां राक्षसीभिः समावृताम् उपवासकृशां दीनां पुनः पुनः निःश्वसन्तीं (सीतां बुबुधे)।

**आशयः** - अनन्तरं मलिनवस्त्रधारिणीं निशाचरस्त्रीभिः आवृतां निराहारव्रतां क्षीणां निःश्वसन्तीं सीतां बुबुधे।

**2. अश्रुपूर्णमुखीं दीनां कृशामनशनेन च।**
**शोकध्यानपरां दीनां नित्यं दुःखपरायणाम्।।**

**पदार्थाः**

| | | |
|---|---|---|
| अश्रुपूर्णमुखीं | - | नेत्रबिन्दुसहितमुखीम् |
| कृशां | - | क्षीणाम् |

| | | |
|---|---|---|
| अनशनेन | - | भक्षणाभावाद् हेतोः |
| शोकध्यानपरां | - | दुःखस्य निरन्तरचिन्तायुक्तां |
| दीनां | - | दीनभावयुक्तां |
| नित्यम् | - | प्रतिदिनम् |
| दुःखपरायणाम् | - | सदा दुःखिताम् |

**विग्रहः** - अश्रुपूर्णमुखीम् - अश्रुभिः पूर्णम् अश्रुपूर्णम्। अश्रुपूर्णं मुखं यस्याः सा अश्रुपूर्णमूखी। ताम् अश्रुपूर्णमुखीम्।

अनशनेन - अशनस्य अभावः, तेन अनशनेन।

शोकध्यानपराम् - शोकस्य ध्यानं परं यस्याः सा, तां शोकध्यानपराम्।

**अन्वयः** - अश्रुपूर्णमुखीं दीनाम् अनशनेन च कृशां शोकध्यानपरां नित्यं दुःखपरायणां तां बुबुधे।

**आशयः** - नेत्राम्बुसहितां क्षीणां भोजनरहितां दुःखविचारपरां दीनभावयुक्तां नित्यं दुःखितां च तां बुबुधे।

**अनन्तरं सः कपिपुङ्गवः सीतां कथं बुबुधे। पश्यामः**

**3 दुःखेन बुबुधे सीतां हनूमाननलंकृताम्।**
**संस्कारेण यथा हीनां वाचमर्थान्तरं गताम्।।**

**पदच्छेदः** - हनूमान् + अनलंकृताम् - हमूमाननलंकृताम्।

**पदार्थाः**

| | | |
|---|---|---|
| दुःखेन | - | कृच्छ्रेण |
| अनलंकृताम् | - | अलङ्काररहिताम् |
| वाचम् | - | वचनम् |
| अर्थान्तरम् | - | अन्यम् अर्थम् |
| बुबुधे | - | ज्ञातवान् |

**विग्रहः** - अनलंकृताम् - न अलंकृता अनलंकृता ताम् अनलंकृताम्।
अर्थान्तरम् - अन्यः अर्थः अर्थान्तरम्।

**अन्वयः** - दुःखेन अनलंकृतां सीतां संस्कारेण हीनाम् अर्थान्तरं गतां वाचं यथा (तथा बुबुधे)।

**आशयः** - अलङ्काररहितां सीताम्, असंस्कृताम् अतः अन्यं विवक्षिताद्भिन्नम् अर्थं प्राप्तां वाचम् इव विज्ञातवान्।

यथा - सकलम् इति पूर्णार्थे प्रयुङ्क्तं पदं भवति किन्तु शकलम् इति अल्पार्थे प्रयुज्यते। सकारस्य स्थाने शकारे अर्थान्तरम्।

**तां सीतां दृष्ट्वा सः किमचिन्तयत् इत्युच्यते -**

**4 एवं सीतां तथा दृष्ट्वा हृष्टः पवनसम्भवः।**
**जगाम मनसा रामं प्रशशंस च तं प्रभुम्।।**

**पदार्थाः**

पवनसम्भवः - वायुपुत्रः
प्रशशंस - प्रशंसाम् अकरोत्

**विग्रहः** - पवनात् सम्भवः यस्य सः पवनसम्भवः।

**अन्वयः** - एवं सीतां तथा दृष्ट्वा हृष्टः पवनसम्भवः मनसा रामं जगाम, तं प्रभुं प्रशशंस च।

**आशयः** - एवं पूर्वोक्तप्रकारेण सीतादेवीं दृष्ट्वा वायुपुत्रः हनूमान् सन्तुष्टः अभवत्। मनसा रामसमीपम् अगच्छत्। तं रामं प्रशशंस च।

**धातुपरिचयः** - जगाम - गम् गतौ धातुः लिट् परस्मैपदी प्र. पु. ए. व.।
जगाम जग्मतुः जग्मुः।
लट् - गच्छति।

**तदानीं सीतायाः अवस्था कीदृशीति वर्णयति श्लोकद्वयेन -**

**5. सा निःश्वसन्ती शोकार्ता कोपोपहतचेतना।**
**आर्ता व्यसृजदश्रूणि मैथिली विललाप च।।**

**पदार्थाः**

| | | |
|---|---|---|
| शोकार्ता | - | अत्यन्तं दुःखिता |
| कोपोपहतचेतना | - | क्रोधेन नष्टचैतन्या |
| व्यसृजत् | - | मुमोच |

**विग्रहः** - कोपोपहतचेतना - कोपेन उपहता चेतना यस्याः सा।

**अन्वयः** - सा निःश्वसन्ती शोकार्ता कोपोपहतचेतना आर्ता मैथिली अश्रूणि व्यसृजत्, विललाप च।

**आशयः** - निःश्वसन्ती अत्यन्तदुःखिता क्रोधेन नष्टचैतन्या सीता अश्रूणि मुमोच विललाप च।

**धातुपरिचयः** - विललाप - 'वि' इत्युपसर्गपूर्वक 'लप्' धातुः लिट् परस्मैपदी प्र. पु. ए. व.।
विललाप विलेपतुः विलेपुः।
लट् विलपति।

मुमोच - मुच्लृ मोचने धातुः लिट् पर. प्र. पु. ए. व.।
मुमोच मुमुचतुः मुमुचुः। मुञ्चति इति लट्।

**6. हनूमानपि विक्रान्तः सर्वं शुश्राव तत्वतः।**
**सीतायास्त्रिजटायाश्च राक्षसीनां च तर्जनम्।।**

**पदच्छेदः** - सीतायाः + त्रिजटायाः + च - सीतायास्त्रिजटायाश्च।

**पदार्थाः**

| | | |
|---|---|---|
| विक्रान्तः | - | पराक्रमशाली |
| तत्वतः | - | पूर्णतया |
| तर्जनम् | - | भर्त्सनम् |

**अन्वयः** - विक्रान्तः हनूमान् अपि सीतायाः त्रिजटायाः च (वचनं) राक्षसीनां तर्जनं च सर्वं तत्वतः शुश्राव।

**आशयः** - पराक्रमशाली स हनूमान् सीतायाः शोकवचनं त्रिजटायाः सान्त्वनं राक्षसस्त्रीणां सीतां प्रति भर्त्सनं च पूर्णतया अश्रृणोत्।

**धातुपरिचयः** - शुश्राव - 'श्रु' (श्रवणे) - लिट् परस्मैपदी प्र. पु. ए. व.।
शुश्राव शुश्रुवतुः शुश्रुवुः।
लट् श्रृणोति।

राक्षसः - राक्षसः कौणपः क्रव्याक्क्रव्यादोऽस्त्रप आशरः।
रात्रिंचरो रात्रिचरः कर्वुरो निकषात्मजः।
यातुधानपुण्यजनो नै ऋतो यातुरक्षसी।। इत्यमरः।

**सीतां दृष्ट्वा हनूमान् किं कर्तुं निश्चिकाय। पश्यामः -**

**7. ईक्ष्वाकूणां वरिष्ठस्य रामस्य विदितात्मनः।**
**शुभानि धर्मयुक्तानि वचनानि समर्पयन्।**
**श्रावयिष्यामि सर्वाणि मधुरं प्रब्रुवन् गिरम्।।**

**पदार्थाः**

| | | |
|---|---|---|
| इक्ष्वाकूणां | - | इक्ष्वाकुवंशजानाम् |
| वरिष्ठस्य | - | श्रेष्ठस्य |
| विदितात्मनः | - | आत्मज्ञस्य |

धर्मयुक्तानि - धर्मसहितानि

गिरम् - वाचम्

**विग्रहः** - विदितात्मनः - विदितः आत्मा येन सः विदितात्मा तस्य विदितात्मनः।

**अन्वयः** - इक्ष्वाकूणां वरिष्ठस्य रामस्य च धर्मयुक्तानि शुभानि वचनानि सर्वाणि समर्पयन् इति गिरं मधुरं प्रब्रुवन् श्रावयिष्यामि।

**आशयः** - रघुवंशे श्रेष्ठस्य आत्मज्ञस्य रामस्य धर्मसहितानि शुभानि रागसम्देश वचनानि श्रावयन् सर्वाणि कार्याणि श्रावयिष्यामि इति उक्त्वा मधुरां वाचम् अवोचत्।

**धातुपरिचयः** - श्रावयिष्यामि - श्रु - श्रवणे णिजन्तात् लृट् परस्मैपदी उ. पु. ए. व.।

श्रावयिष्यामि श्रावयिष्यावः श्रावयिष्यामः।

**सः सीतां किमश्रावयदित्याद -**

**8 राजा दशरथो नाम रथकुञ्जरवाजिमान्।**

**पुण्यशीलो महाकीर्तिरिक्ष्वाकूणां महायशाः।।**

**पदच्छेदः** - दशरथो नाम - दशरथः + नाम।

महाकीर्तिरिक्ष्वाकूणाम् - महाकीर्तिः + इक्ष्वाकूणाम्।

**पदार्थाः**

रथकुञ्जरवाजिमान् - रथगजाश्वसहितः

महायशाः - महाकीर्तिः

**विग्रहः** - रथकुञ्जरवाजिमान् - रथाः कुञ्जराः वाजिनः च, अस्य सन्तीति।

पुण्यशीलः - पुण्यं शीलं यस्य सः।

महाकीर्तिः - महती कीर्तिः यस्य सः।

महायशाः - महत् यशः यस्य सः।

**अन्वयः** - इक्ष्वाकूणां पुण्यशीलः महायशाः रथकुञ्जरवाजिमान् महाकीर्तिः दशरथो नाम राजा (आसीत्)।

**आशयः** - इक्ष्वाकुवंशजानाम् उत्तमशीलयुक्तः कीर्तिमान् रथगजतुरगयुक्तः पुण्यशीलः दशरथो नाम राजा आसीत्।

**कोशः** - कुञ्जरः - दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः
मतङ्गजो गजो नागः कुञ्जरो वारणः करी।।

- वाजी - वाजी वाहर्वगन्धर्वहयसैन्धवसप्तयः।
आजानेयाः कुलीनाः स्युर्विनीताः साधुवाहिनः।। इत्यमरः।

**9. तस्य पुत्रः प्रियो ज्येष्ठस्ताराधिपनिभाननः।**
**रामो नाम विशेषज्ञः श्रेष्ठः सर्वधनुष्मताम्।।**

**पदच्छेदः** - ज्येष्ठस्ताराधिपनिभाननः - ज्येष्ठः + ताराधिपनिभाननः।

**पदार्थाः**

| | | |
|---|---|---|
| ताराधिपनिभाननः | - | चन्द्रसमानमुखः |
| सर्वधनुष्मताम् | - | सर्वधनुर्धराणाम् |

**विग्रहः** - ताराधिपनिभाननः - ताराधिपेन निभम् आननं यस्य सः।
धनुष्मताम् - धनु अस्य अस्ति इति धनुष्मान् तेषां।

**अन्वयः** - तस्य प्रियः ज्येष्ठः पुत्रः ताराधिपनिभाननः रामः नाम विशेषज्ञः सर्वधनुष्मतां श्रेष्ठः च आसीत्।

**आशयः** - तस्य दशरथस्य ज्येष्ठपुत्रः चन्द्रतुल्यमुखः रामः नाम सर्वं विशेषं जानानः धनुर्धराणां श्रेष्ठः च आसीत्।

**तदानीं सीता हनूमन्तं कथमपश्यदित्याचष्टे -**

**10. सा ददर्श कपिं तत्र प्रश्रितं प्रियवादिनम्।**
**फुल्लाशोकोत्कराभासं तप्तचामीकरेक्षणम्।।**

**पदार्थाः**

चामीकरम् - सुवर्णम्

**विग्रहः** - प्रियवादिनम् - प्रियं वदितुं शीलमस्यास्तीति प्रियवादी, तम् ।(ताच्छील्ये णिनि)

फुल्लाशोकोत्कराभासम् - फुल्लानाम् अशोकानाम् उत्करा: (समूहा) इव आभासते इति।

तप्तचामीकरेक्षणम् - तप्तं च तत् चामीकरञ्च तप्तचामीकरम् इव ईक्षणे यस्य तम्।

चामीकरम् - सुवर्णम्।

**अन्वयः** - सा तत्र प्रश्रितं प्रियवादिनं फुल्लाशोकोत्कराभासं तप्तचामीकरेक्षणं कपिं ददर्श।

**आशयः** - सा सीता तत्र अशोकवनिकायां विनीतम् अशोकपुष्पाणां मञ्जरीमिव शोभमानं स्वर्णवर्णयुक्तनेत्रसहितं वानरं हनूमन्तम् अपश्यत्।

**धातुपरिचयः** - ददर्श दृशिर् प्रेक्षणे लिट् प. प. प्र. पु. ए. व.।

**कोशः** - चामीकरम् - स्वर्णं सुवर्णं कनकं हिरण्यं हेमहाटकम्।
तपनीयं शातकुम्भं गाङ्गेयं भर्म्मकर्बुरम्।।
चामीकरं जातरूपं महारजतकाञ्जने।
रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोस्त्रियाम्।।

**11. सा तस्य वचनं श्रुत्वा रामकीर्तनहर्षिता।**
**उवाच वाक्यं वैदेही हनूमन्तं द्रुमाश्रितम्॥**

**पदार्थाः**

रामकीर्तनहर्षिता - रामकथाश्रवणेन सन्तुष्टा
द्रुमाश्रितम् - वृक्षाश्रितम्

**विग्रहः** - रामकीर्तनहर्षिता - रामकीर्तनेन हर्षिता।
द्रुमाश्रितम् - द्रुमम् आश्रितः तम्।

**कोशः** - द्रुमः - वृक्षो महीरुहः शाखी विटपी पादपस्तरुः।
अनोकहः कुटस्सालः पलाशी द्रुमागमाः॥
इत्यमरः।

**अन्वयः** - तस्य वचनं श्रुत्वा रामकीर्तनहर्षिता सा वैदेही द्रुमाश्रितं हनूमन्तं वाक्यम् उवाच।

**आशयः** - तस्य हनूमतः वचनं श्रुत्वा रामकीर्तनसन्तुष्टा सा सीता वृक्षमाश्रित्य तिष्ठन्तं हनूमन्तं वाक्यम् उवाच।

**धातुपरिचयः** - उवाच - ब्रूञ् व्यक्तायां वाचि 'लिट्' परस्मैपदी प्र. पु. ए.व.।
उवाच ऊचतुः ऊचुः।
लट् ब्रवीति।

**सीता किमुवाचेति व्याचष्टे -**

**12. द्वौ मासौ तेन मे कालो जीवितानुग्रहः कृतः।**
**ऊर्ध्वं द्वाभ्यां तु मासाभ्यां ततस्त्यक्ष्यामि जीवितम्॥**

**पदच्छेदः** - ततस्त्यक्ष्यामि - ततः + त्यक्ष्यामि।
कालो जीवितानुग्रहः - कालः + जीवितानुग्रहः।

**अन्वयः** - तेन मे द्वौ मासौ जीवितानुग्रहः कालः कृतः। द्वाभ्यां मासाभ्याम् ऊर्ध्वं तु ततः जीवितं त्यक्ष्यामि।

**आशयः** - तेन रावणेन मासद्वयम् एव जीवितावधिः कल्पितः। ततः परम् अहं जीवितं त्यक्ष्यामि।

**धातुपरिचयः** - त्यक्ष्यामि - त्यज् - उत्सर्गे लृट् परस्मैपदी उ. पु. ए. व.।
त्यक्ष्यामि त्यक्ष्यावः त्यक्ष्यामः।
लट् त्यजति।

**तदानीं हनूमान् किमकरोत् इत्याह -**

**13. तस्यास्तद् वचनं श्रुत्वा हनूमान् हरिपुङ्गवः।**
**दुःखाद्दुःखाभिभूतायाः सान्त्वमुत्तरमब्रवीत्।।**

**पदच्छेदः** - तस्यास्तद् - तस्याः + तत्।

**पदार्थाः**

| | | |
|---|---|---|
| हरिपुङ्गवः | - | वानरश्रेष्ठः |
| दुःखाभिभूतायाः | - | शोकसहितायाः |
| सान्त्वं | - | सान्त्वनम् |

**विग्रहः** - दुःखाभिभूतायाः - दुःखेन अभिभूता, तस्याः।
हरिपुङ्गवः - पुमान्श्चासौ गौश्च पुङ्गवः हरिषु पुङ्गवः।

**अन्वयः** - दुखाभिभूतायाः तस्याः तद् वचनं श्रुत्वा हरिपुङ्गवः हनूमान् दुःखात् सान्त्वम् उत्तरम् अब्रवीत्।

**आशयः** - सशोकायाः तस्याः सीतायाः वचनं श्रुत्वा वानरश्रेष्ठः हनूमान् तां सीतां कृच्छ्रेण सान्त्वनवाचम् अवदत्।

**धातुपरिचयः** - अब्रवीत् - ब्रूञ् व्यक्तायां वाचि लङ् परस्मैपदी प्र. पु. ए. व.।
अब्रवीत् अब्रूताम् अब्रुवन्
लट् ब्रवीति।

**14. अहं रामस्य सन्देशात् देवि दूतस्तवागतः।**
**वैदेहि कुशली रामः स त्वां कौशलमब्रवीत्।।**

**पदच्छेदः** - दूतस्तवागतः - दूतः + तव + आगतः।

**पदार्थाः**

| | | |
|---|---|---|
| देवि | - | हे सीते |
| त्वाम् | - | भवतीम् |
| अब्रवीत् | - | उवाच |

**विग्रहः** - कुशली - कुशलः अस्य अस्तीति।
वैदेहि - विदेहस्य अपत्यं स्त्री वैदेही, तस्याः सम्बुद्धिः।

**अन्वयः** - हे देवि, अहं रामस्य सन्देशात् तव (समीपम्) आगतः दूतः। हे वैदेहि, रामः कुशली सः त्वां कौशलम् अब्रवीत्।

**आशयः** - हे देवि, अहं श्रीरामसकाशात् आगतः दूतः अस्मि। हे सीते, रामः सन्तुष्टः त्वां कौशलम् अपृच्छत् च।

**15. लक्ष्मणश्च महातेजा भर्तुस्तेऽनुचरः प्रियः।**
**कृतवाञ्छोकसंतप्तः शिरसा तेऽभिवादनम्।।**

**पदच्छेदः** -

| | | |
|---|---|---|
| लक्ष्मणश्च | - | लक्ष्मणः + च। |
| महातेजा भर्तुस्तेऽनुचरः | - | महातेजाः + भर्तुः + ते + अनुचरः। |
| कृतवाञ्छोकसंतप्तः | - | कृतवान् + शोकसंतप्तः। |
| तेऽभिवादनम् | - | ते+ अभिवादनम्। |

**पदार्थाः**

| | | |
|---|---|---|
| भर्तुः | - | पत्युः (श्रीरामस्य) |
| अनुचरः | - | सेवकः |
| शोकसंतप्तः | - | दुःखसंतप्तः |
| शिरसा | - | मूर्ध्ना |

**विग्रहः** - महातेजाः - महत् तेजः यस्य सः महातेजाः।

शोकसंतप्तः - शोकेन संतप्तः।

**अन्वयः** - ते भर्तुः प्रियः अनुचरः शोकसंतप्तः लक्ष्मणः च शिरसा ते अभिवादनं कृतवान्।

**आशयः** - भवत्याः भर्तुः श्रीरामस्य प्रियः अनुचरः अनुजः लक्ष्मणः च त्वाम् अभिवादयते।

**16. सा तयोः कुशलं देवी निशम्य नरसिंहयोः।**
**प्रीतिसंहृष्टसर्वाङ्गी हनूमन्तमथाब्रवीत्।।**

**पदच्छेदः** - हनूमन्तमथाब्रवीत् - हनूमन्तम् + अथ + अब्रवीत्।

**पदार्थाः**

| | | |
|---|---|---|
| निशम्य | - | श्रुत्वा |
| तयोः नरसिंहयोः | - | तयोः रामलक्ष्मणयोः |
| अब्रवीत् | - | उवाच |
| प्रीतिसंहृष्टसर्वाङ्गी | - | तोषेण पुलकितसकलावयवा |

**विग्रहः** - प्रीतिसंहृष्टसर्वाङ्गी - प्रीत्या संहृष्टं सर्वाङ्गं यस्याः सा ।

नरसिंहयोः - नरौ सिंहौ इव नरसिंहौ, तयोः। "उपमितं व्याघ्रादिभिः सामान्यप्रयोगे।"

**अन्वयः** - अथ प्रीतिसंहृष्टसर्वाङ्गी सा देवी तयोः नरसिंहयोः कुशलं निशम्य हनूमन्तम् अब्रवीत्।

**आशयः** - सुन्दरी सा सीतादेवी रामलक्ष्मणयोः नरश्रेष्ठयोः सौख्यं श्रुत्वा अतीव सन्तुष्टा भूत्वा मारुतिम् उवाच।

**सीतायाः प्रतिवचनम्-**

**17. कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे।**
**एति जीवन्तमानन्दो नरं वर्षशतादपि।।**

**पदच्छेदः** - आनन्दो नरम् - आनन्दः + नरं।
वर्षशतादपि - वर्षशतात् + अपि।

**पदार्थाः**

| | | |
|---|---|---|
| कल्याणी | - | शुभकरी |
| गाथा | - | गानमिव मधुरा |
| प्रतिभाति | - | प्रतीयते |
| एति | - | प्राप्नोति |
| आनन्दः | - | सन्तोषः |
| वर्षशतात् | - | शतवर्षं यावत् |

**विग्रहः** - वर्षाणाम् शतं - वर्षशतं - तस्मात्।

**अन्वयः** - इयं लौकिकी गाथा मे कल्याणी प्रतिभाति बत। आनन्दः जीवन्तं नरं वर्षशतादपि एति।

**आशयः** - इयं लोके प्रसृता श्रीरामस्य वृत्तान्तमयी गाथा (गीतं) श्रुत्वा मे मङ्गलकरी प्रतीयते। आनन्दः जीवन्तं नरं वर्षशताधिकम् एति।

**धातुपरिचयः** - एति - इण् गतौ लट् परस्मैपदी प्र. पु. ए. व.।
एति इतः यन्ति।

**तच्छ्रुत्वा सः किमकरोत्-**

**18. तस्यास्तद् वचनं श्रुत्वा हनूमान्मारुतात्मजः।**
**सीतायाः शोकतप्तायाः समीपमुपचक्रमे।।**

**पदच्छेदः** - तस्यास्तद् - तस्याः + तद्।

**पदार्थाः**

| | | |
|---|---|---|
| तस्याः | - | सीतायाः |
| शोकः | - | दुःखम् |
| उपचक्रमे | - | समीपं प्राप्तः |
| मारुतात्मजः | - | हनूमान् |

**विग्रहः** - मारुतस्य आत्मजः मारुतात्मजः।

**अन्वयः** - मारुतात्मजः हनूमान् तत् वचनं श्रुत्वा शोकतप्तायाः तस्याः सीतायाः समीपम् उपचक्रमे।

**आशयः** - हनूमान् तत् वचनं श्रुत्वा दुःखेन तप्तायाः तस्याः जनकपुत्र्याः समीपं मन्दं मन्दं प्राप्तवान्।

**धातुपरिचयः** - उपचक्रमे - उपपूर्वक क्रम पादविक्षेपे लिट् आत्मनेपदी प्र. पु. ए. व.।
उपचक्रमे उपचक्रमाते उपचक्रमिरे।

**कोशः** - मारुतः - समीरमारुतमरुज्जगत्प्राणसमीरणाः।
नभस्वद्वातपवनपवमानप्रभञ्जनाः।। इत्यमरः।

# पठनप्रवर्तनानि ।

- **आदिकाव्यस्य पाठभागं सङ्घशः एकैकशश्च कक्ष्यायाम् आलपतु ।**

  **श्रद्धेयाः अंशाः ।**

  - नूतनपदचयनम् अर्थनिर्धारणञ्च ।
  - सन्धियुक्तपदचयनं विश्लेषणञ्च ।
  - समस्तपदचयनं विग्रहवाक्यलेखनं च ।
  - स्वकीये निघण्डौ यथाविधि सन्निवेशनम् ।
  - श्लोकस्य आलपनम् ।

- **खण्डिकालेखनम्**

  - हनूमतः दौत्यनिर्वहणपटुता ।
  - हनूमत्सीतासंवादः ।
  - हनूमता दृष्टा सीता ।

- **आस्वादनटीकां लिखत ।**

  - दुःखेन बुबुधे सीतां हनूमाननलंकृताम् ।<br>संस्कारेण यथा हीनां वाचमर्थान्तरं गताम् ।।
  - कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे ।<br>एति जीवन्तमानन्दो नरं वर्षशतादपि ।।

- **पाठभागं गद्यरूपेण परिवर्तयत ।**

  **श्रद्धेयाः अंशाः ।**

  - चर्चा
  - आशयक्रोडीकरणम् ।
  - उचितया भाषया लेखनम् ।

पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम्* | क्लेशनिर्देशः |
|---|---|---|---|---|
| 1. | पद्यानि आलपितानि | | | |
| 2 | अन्वयलेखनम् कृतम्। | | | |
| 3. | खण्डिकालेखनम् कृतम्। | | | |
| 4. | आस्वादनटीका रचिता गद्यरुपेण परिवर्तिता | | | |

*भागिकतया कृतं चेत् कथं पूर्णं कृतम् इति संस्थया सूचयतु।

१. अध्यापकसाहाय्येन।

२. ग्रन्थ साहाय्येन।

३. छात्राणां साहाय्येन।

४. इतरेषां साहाय्येन।

# संस्कृतोपासकाः

संस्कृतस्य कृते जीवन्
संस्कृतस्य कृते यजन्।
आत्मानमाहुतिं मन्ये
वन्दे संस्कृतमातरम्।।

गीर्वाणी वाण्युपासकाः अनेके आसन् अस्मिन् भार्गवक्षेत्रे। तेषां योगदानैः पुष्टा चेयं भाषा। तेषु केषाञ्चन दिङ्मात्रजीवनचरितं पठामः।

# ४

# संस्कृतोपासकाः

प्राचीनकालादारभ्यैव केरलेषु अनेके संस्कृतसाहित्यप्रमुखाः संस्कृतशास्त्रज्ञाः च आसन्। कुलशेखरशक्तिभद्रादयः नाटककाराः श्रीशङ्करभगवत्पादप्रभृतयः वेदान्तप्रस्थानस्थापकाः काव्यकाराश्च शङ्करकविप्रभृतयः साहित्यकुशलाः च इमां केरलधरणीम् अभूषयन्। तत्र 'स्थालीपुलाकन्यायेन' केचन संस्कृतोपासाकाः अत्र निदर्शनरूपेण प्रतिपाद्यन्ते।

1. कुलशेखरः।
2. शक्तिभद्रः।
3. मेल्पुत्तूर् नारायणभट्टपादाः।
4. रामपाणिवादः।
5. डा. के.एन्. एषुत्तच्छन्।
6. डा. पी.के. नारायणप्पिलै।

## मेल्पुत्तूर् नारायणभट्टपादाः।

केरलीयसंस्कृतकविषु प्रथितयशो भवति मेल्पुत्तूर् नारायणभट्टः। क्रिस्तोः परं षोडशे शतके उपरिनवग्रामे (मेल्पुत्तूर्) अयं लब्धजन्माऽभूत्। मातृगुप्तः, माधवाचार्यः, दामोदरः, अच्युतपिषारटिः इत्येते नारायणभट्टस्य गुरवः आसन्। मीमांसा, तर्कशास्त्रं,

व्याकरणशास्त्रम् इत्यादिषु अयं निष्णातः आसीत्। सोऽयं सहस्राधिकैः श्लोकैः भागवतकथाम् अवलम्ब्य 'नारायणीयम्' इति स्तोत्रकाव्यं व्यरचयत्। नारायणीयस्य रचनया श्रीनारायणभट्टः वातरोगात् विमुक्तः इति ऐतिह्यम् अपि विद्यते। श्रीपादसप्ततिः गुरुवायुपुरेशस्तवः च तस्य अन्यत् स्तोत्रकाव्यद्वयम्। धातुकाव्यं, मानमेयोदयस्य मानभागः, प्रक्रियासर्वस्वम् अपाणिनीयप्रामाण्यसाधनम्, आश्वलायनक्रियाक्रमः इत्येते नारायणभट्टस्य अन्ये ग्रन्थाः भवन्ति। विंशत्यधिकाः चम्पूग्रन्थाः अपि तेन रचिताः।

## कुलशेखरः।

क्रिस्तोः परम् अष्टमे शतके केरलेषु लब्धजन्मा अयं कुलशेखरः चेरराज्यस्य अधिपः आसीत्। कुलशेखरस्य शासनकालः चेरराज्यस्य सुवर्णकालः इति इतिहासविदो वदन्ति। सोऽयं वैष्णवधर्मस्य प्रचारकः च आसीत्। सुभद्राधनञ्जयं, तपतीसंवरणम् इति रूपकद्वयं तेन विरचितम्। कृष्णसोदर्याः सुभद्रायाः अर्जुनस्य च मिथोऽनुरागः विवाहश्च सुभद्राधनञ्जयस्य इतिवृत्तं भवति। सूर्यपुत्र्याः तपत्याः संवरणस्य च कथा तपतीसंवरणे वर्णिता। रूपकद्वयमपि केरलीयसंस्कृतरूपकाभिनये कूटियाट्टाख्ये अद्यापि देवालयेषु अभिनीयते। 'मुकुन्दमाला' इति स्तोत्रकाव्यमपि तेन विरचितमस्तीति प्रथा।

## रामपाणिवादः।

केरलीयसंस्कृतमहाकविषु अन्यतमो भवति रामपाणिवादः। पालक्काट्जनपदे किल्लिक्कुरिश्शिमङ्गलं नामके ग्रामे क्रिस्त्वब्दस्य षोडशशतकस्यान्तिमे अयं लब्धजन्माऽभूत्। कैरलीसाहित्ये प्रसिद्धः 'कुञ्चन् नम्प्यार्' रामपाणिवादः एव इति केचिद् अभिप्रयन्ति। रामपाणिवादस्य रचनासु राघवीयं विष्णुविलासः इति महाकाव्यद्वयं, चन्द्रिका, लीलावती इति वीथीद्वयं, आख्यायिकापद्धतिः प्राकृतवृत्तिः इति व्याकरणग्रन्थौ, गीतरामं पञ्चपदी इति गीतिकाव्ये, वृत्तवार्तिकं तालप्रस्तारः श्रीकृष्णविलासकाव्यस्य विलासिनी व्याख्या शारिकासन्देशः च अन्तर्भवन्ति। प्रायशः अष्टाविंशत्यधिकाः ग्रन्थाः तेन रचिताः इति पण्डितानां मतम्।

## शक्तिभद्रः।

क्रिस्तोः परम् अष्टमे शतके दक्षिणकेरलेषु 'कुन्नत्तूर्' देशे 'कोडुमण्' ग्रामे जातोऽयं शक्तिभद्रः श्रीशङ्करभगवत्पादानां समकालिकः आसीत् इति श्रूयते। सोऽयम् आश्चर्यचूडामणिनामकम् अद्भुतरसप्रधानम् उत्तमं नाटकं विरचयामास। दाक्षिणात्येषु संस्कृतनाटककर्तृषु अयं प्रथमगणनीयः भवति। श्रीरामस्य वनवासादारभ्य सीतायाः अग्निप्रवेशपर्यन्ता रामायणकथा अस्मिन् नाटके वर्ण्यते। अयं कविः शङ्करभगवत्पादानां पुरतः नाटकम् इदम् अश्रावयत्। तदानीं मौनव्रतनिष्ठः आचार्यः न किमपि अवदत्। अतः तेन नाटकमिदम् अवद्यं मन्वानः अग्निसादकरोत्। पश्चात् भगवतैव स्वस्मरणात् आकलितं नाटकमिदम्। "भवतु भुवनभूत्यै सर्वरक्षोवधेन" इति नाटकस्थस्य वचनस्य सारस्यम् अनुचिन्त्य भगवता आचार्येण कविरयं 'भुवनभूतिनाम्ना' पुरस्कृतः इति श्रूयते।

## डा. के.एन्. एषुत्तच्छन्।

केरलीयः अयं कविः के.एन्. एषुत्तच्छन् आधुनिकसंस्कृतकविषु प्रथमगणनीयः भवति। अनेन रचितं केरलोदयनामकं चरित्रकाव्यम् आधुनिकसंस्कृतकाव्येषु अद्वितीयं विभाति। कुरुवान्तोटि लक्ष्मियम्मा, कुटियिरिक्कल् कृष्णनेषुत्तच्छन् दम्पत्योः पुत्रोऽयं एकादशोत्तरनवशताधिकसहस्रतमे क्रिस्त्वब्दे मेय्मासस्य एकविंशतितमे दिने (२१.५.१९११) पट्टाम्बीजनपदे जनिमलभत। कविरयं संस्कृतपण्डितः, भाषाशास्त्रज्ञः, इतिहासज्ञः च आसीत्। अस्य 'केरलोदये' केरलीयसंस्कृतेः वैविध्यं सम्यक् प्रदर्श्यते। केरलोत्पत्तेः सर्वाः घटनाः अस्मिन् काव्ये सरसं प्रतिपाद्यन्ते। अयं पण्डितश्रेष्ठः (२८.१०.१९८१) एकाशीत्युत्तरनवशताधिकसहस्रतमे ओक्टोबर्मासस्य अष्टाविंशे दिने दिवंगतः। स्वप्नमञ्जरी, स्मृतिमञ्जरी, इतिहासमञ्जरी चेति त्रिधा केरलोदयं महाकाव्यं विभक्तम्। काव्यमध्ये गानानां समावेशनेन काव्यमिदं काव्यान्तरेभ्यः व्यतिरिक्तं स्थानमेति।

## डा. पी.के. नारायणप्पिल्ला

आधुनिकसंस्कृतकविषु अन्यतमोऽयं पी.के. नारायणपिल्ला महानुभावः महाकाव्यद्वयस्य कर्ता भवति। विवेकानन्दस्वामिनः चरितमुपजीव्य 'विश्वभानुः' इति

श्रीरामकृष्णपरमहंसचरितम् उपजीव्य 'धर्मसागरः' इति च महाकाव्यद्वयं तेन रचितम्। अस्य विश्वभानुनामकं महाकाव्यम् उत्तरप्रदेशसर्वकारेण 'कालिदाससम्मानेन' पुरस्कृतम्। केरलसाहित्यअक्कादमीपुरस्कारः च अयमलभत। पण्डितवरेण्योऽयं केरलसर्वकलाशालायाः मलयालविभागस्य प्रथमाध्यक्षपदवीम् अलंकृतवान्। श्रीशङ्करसंस्कृतसर्वकलाशालासंस्थापनविषये एकाङ्गसमितिरूपेण विषयान् पर्यालोच्य आयोगनिर्देशान् समर्पितवान्।

**पदार्थाः**

| | | |
|---|---|---|
| लब्धजन्मा | - | जातः। |
| निष्णातः | - | समर्थः। |
| स्तोत्रकाव्यं | - | स्तुतिपरं काव्यम्। |
| **व्यरचयत्** | - | **विरचितवान्।**<br>**वि पूर्वक रच् धातोः लङ् परस्मैपदे प्र. पु. ए. व.। लट् विरचयति।** |
| उपरिनवग्रामः | - | मेल्पुत्तूर् ग्रामः। |
| ऐतिह्यम् | - | इतिहासम्बन्धि। |
| शासनकालः | - | भरणकालः। |
| मिथः | - | अन्योन्यम्। |
| इतिहासविदः | - | इतिहासज्ञाः। |
| **आकलितम्** | - | **सङ्कलितम्**<br>**आङ्पूर्वक कल् धातोः क्तान्तं रूपम्।** |
| अग्निसादकरोत् | - | अग्न्यधीनमकरोत् |
| विरचितम् | - | निर्मितम्। |

**पदच्छेदः**

इत्येते - इति + एते

विंशत्यधिकाः - विंशति + अधिकाः

लब्धजन्माऽभूत् - लब्धजन्मा + अभूत्

सोऽयं - सः + अयम्

मिथोऽनुरागः - मिथः + अनुरागः

विवाहश्च - विवाहः + च

**विग्रहः**

लब्धजन्मा - लब्धं जन्म येन सः।

कृष्णसोदर्याः - कृष्णस्य सोदरी, तस्याः।

वैष्णवधर्मः - वैष्णवानां धर्मः।

**धातुपरिचयः**

भजन्ते - भज् धातुः लट् आत्मनेपदी प्र. पु. ब. व.।

भजते भजेते भजन्ते।

**अमरकोशः**

प्रवीणः निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः।

वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि।

मिथः मिथोन्योऽन्यो रहस्यपि।

## पठनप्रवर्तनानि।

❖ **नूतनपदानि सञ्चिनुत। कोशसाहाय्येन अर्थं निर्धारयत। स्वकीये पदकोशे अकारादिक्रमेण तानि सन्निवेशयत।**

**श्रद्धेयाः अंशाः।**

- वाचनेन पदानां चयनम्।
- कोशसाहाय्येन अर्थचयनम्।
- ततः स्वकीयकोशे निवेशनम्।

❖ **संश्लिष्टपदानि सञ्चिनुत। सन्धिविश्लेषणं कुरुत।**

**श्रद्धेयाः अंशाः।**

- वाचनेन संश्लिष्टपदानां चयनम्।
- सन्धियुक्तपदानां लेखनम्।
- सन्धिविश्लेषणम्।

❖ **समस्तपदानि सञ्चिनुत। विग्रहवाक्यं लिखत।**

**श्रद्धेयाः अंशाः।**

- वाचनेन समस्तपदानां चित्वा लेखनम्।
- समस्तपदानां विग्रहः।
- विग्रहलेखनम्।

❖ **केरलीयसंस्कृतसाहित्यम् अधिकृत्य लघूपन्यासम् आरचयत।**

**श्रद्धेयाः अंशाः।**

- पाठ्यांशानां वाचनम्।
- चर्चाद्वारा चर्चितबिन्दूनां क्रोडीकृत्य लेखनम्।
- वैयक्तिकरीत्या उपन्यासरचना।

❖ **केरलीयसंस्कृतसाहित्यकारान् अधिकृत्य लघुटिप्पणीं लिखत।**

**श्रद्धेयाः अंशाः।**

- पाठ्यांशानां वाचनम्।
- चर्चाद्वारा चर्चितबिन्दूनां क्रोडीकृत्य लेखनम्।

- वैयक्तिकरीत्या लघुटिप्पणीलेखनम्।

❖ **यथोचितं योजयत।**

| | | |
|---|---|---|
| डा. के.एन्. एषुत्तच्छन् | लीलावती | भागवतकथा |
| रामपाणिवादः | क्रिस्तुभागवतम् | चरित्रकाव्यम् |
| प्रोफसर् पी.सी. देवस्या | विश्वभानुः | वीथी (रूपकम्) |
| नारायणभट्टपादः | केरलोदयम् | महाकाव्यम् |
| डी. पी.के. नारायणपिल्लै | नारायणीयम् | विवेकानन्दः। |

**श्रद्धेयाः अंशाः।**

- पाठ्यांशानां वाचनम्।
- चर्चाद्वारा क्रोडीकृत्य योजनम्।
- वैयक्तिकरीत्या योजनम्।

❖ **अधोलिखितानि वर्षाणि सम्यक् पठित्वा संख्यारूपेण भाषारूपेण च परिवर्तयत।**

- अस्माकं स्वातन्त्र्यदिनम्।
- भवतां जन्मदिनम्।
- गान्धिजयन्ती।
- विवेकानन्दजन्मदिनम्।
- अस्माकं गणतन्त्रदिनम्।

**श्रद्धेयाः अंशाः।**

- प्रसिद्धदिनानां वाचनं स्मरणं च।
- चर्चाद्वारा अवबोधनम्।
- लेखनम्।

❖ **पाठभागे अपरामृष्टं कमपि संस्कृतोपासकमधिकृत्य दश वाक्यानि लिखत।**

**पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् * | क्लेशनिर्देशः |
|---|---|---|---|---|
| 1. | पदकोशरचना कृता | | | |
| 2. | संश्लिष्टपदानि चितानि | | | |
| 3. | समस्तपदानि चितानि | | | |
| 4. | लघूपन्यासलेखनम् कृतम् | | | |
| 5. | लघुटिप्पणी लिखिता | | | |
| 6. | लघूपन्यासमारचितम् वर्षाणि संख्यारूपेण भाषारूपेण च परिवर्तितानि | | | |
| 7. | यथोचितं योजनं कृतम् | | | |

*भागिकतया कृतं चेत् कथं पूर्णं कृतम् इति संस्थया सूचयतु।

१. अध्यापकसाहाय्येन।

२. ग्रन्थसाहाय्येन।

३. छात्राणां साहाय्येन।

४. इतरेषां साहाय्येन।

## अधिकविस्तरः

स्थालीपुलाकन्यायः - स्थाल्यां पुलाकाः (तण्डुलानि) निक्षिप्य पाकं करोति, ततः अग्निसंयोगेन सर्वेषां तण्डुलकणानां पाकः जातो वा न वेति ज्ञानाय एकैकं आदाय न परीक्ष्यते, परन्तु तस्मादेकस्य द्वित्राणां वा पाकान्निश्चिनोति। न्यायोऽयं स्थालीपुलाकन्यायेन प्रथितः।

# पुत्रं दुष्टान्निलीयते।

**“भासो हासः कविकुलगुरुः कालिदासो विलासः।”**

भासस्य रूपकाणि कालिदासभट्टबाणादिभिरपि समादृतानि। बालचरितं तेषु अन्यतमं भवति। दैववशात् पुत्रं त्यक्तुं निर्बन्धितौ देवकीवसुदेवौ अस्मिन् नाटके सर्वेषां हृदयं हरतः। नाटकेऽन्तर्भूतां करुणां मनसि धर्तुं शक्यते चेत् समाजः कियदभ्युन्नतिं न प्राप्नुयात्।

# ५

# पुत्रं दुष्टान्निलीयते।

महाकविः भासः कालिदासादपि प्राचीनः इति कालिदासनाटकाद् मालविकाग्निमित्राद् अवगन्तुं शक्यते। अस्य रूपकाणि त्रयोदश इति साहित्यचरितज्ञाः कथयन्ति। एतानि भासनाटकचक्रमिति संज्ञया प्रथन्ते। तानि -

| *संख्या* | *रूपकम्* | *अवलम्बग्रन्थः* |
|---|---|---|
| १ | प्रतिमानाटकम् | रामायणम् |
| २ | अभिषेकनाटकम् | " |
| ३ | पञ्चरात्रम् | महाभारतम् |
| ४ | मध्यमव्यायोगः | " |
| ५ | दूतघटोत्कचम् | " |
| ६ | दूतवाक्यम् | " |
| ७ | ऊरुभङ्गम् | " |
| ८ | कर्णभारम् | " |
| ९ | चारुदत्तम् | बृहत्कथा |
| १० | अविमारकम् | " |
| ११ | प्रतिज्ञायौगन्धरायणम् | " |
| १२ | स्वप्नवासवदत्तम् | " |
| १३ | बालचरितम् | हरिवंशम् |

स्यानन्दूरपुरस्थसंस्कृतग्रन्थालयाध्यक्षेण श्रीमता डा. टी. गणपतिशास्त्रिमहोदयेन 1910 तमे क्रिस्त्वब्दे एतानि संशोध्य सटिप्पणं प्रकाशितानि।

**वसुदेवःस्वपुत्रं शिशुं कृष्णं कंसात् त्रातुं मथुरायाः बहिरागत्य मार्गे श्मशाने यदृच्छया सन्दृष्टस्य नन्दगोपस्य हस्ते समर्पयति। मृतामिति मत्वा नन्दगोपेनोपेक्षितां बालिकां जीवन्तीं ज्ञात्वा वसुदेवः तामादाय देवकीसमीपं प्रत्यागच्छति।**

**अयमेवात्र कथांशः -**

(*ततः प्रविशति बालहस्ता देवकी*)

देवकी - हा धिक्! पुत्रकस्य मे महानुभावत्वं सूचयिष्यन्ति जन्मसमयसमुद्भूतानि महानिमित्तानि। क्व नु गत आर्यपुत्रः? अम्मो! एष आर्यपुत्रो हर्षविस्मयफुल्लनयन इत एवागच्छति।

(*ततः प्रविशति वसुदेवः*)

वसुदेवः - इमानि शुभनिमित्तानि असुरकुलनिहन्ता विष्णुरद्यावतीर्णः इति सूचयन्ति। एषा देवकी षण्णां सुतानां नाशाद्धेतोः सप्तमं रक्षमाणा सुतः इति कृतसंज्ञं कंसमृत्युं वहन्ती आगच्छति।

देवकी - (*उपसृत्य*) जयत्वार्यपुत्रः!

वसुदेवः - देवकि, अर्धरात्रं खलु वर्तते। प्रसुप्तो मथुरायां सर्वो जनः। तस्मात् यावन्न कश्चित् पश्यति तावत् गृहीत्वा अपक्रामामि।

देवकी - क्व आर्यपुत्र इमं नेष्यति?

वसुदेवः - अहमपि न जाने। अथवा यत्र दैवं विधास्यति तत्र बालं गृहीत्वा अपक्रामामि।

देवकी - आर्यपुत्र! इच्छाम्येनं सुदृष्टं कर्तुम्।

वसुदेवः - किं राहोर्वदनमण्डले अयं शशाङ्कः द्रष्टव्यः? त्वया सुदृष्टस्यास्य मृत्युः कंसो भविष्यति।

देवकी - सर्वथा न भविष्यति।

वसुदेवः - यद् भवत्या अभिहितं तद् सर्वदैवतैरभिहितं भवतु। आनय।

देवकी - गृह्णात्वार्यपुत्रः (*बालकं ददाति।*)

वसुदेवः - (*गृहीत्वा*) अहो गुरुत्वं बालस्य। देवकि! प्रविश त्वमभ्यन्तरम्।

देवकी - एषा गच्छामि मन्दभागा। (*निष्क्रान्ता*)

वसुदेवः - हन्त! प्रविष्टा देवकी। यावदहमपि नगरद्वारं संश्रयामि। (*परिक्रम्य*) इदं नगरद्वारम्। यावत्प्रविशामि। (*प्रविश्य*) अये प्रसुप्तो मथुरायां सर्वो जनः। यावदपक्रामामि। (*परिक्रम्य*) निष्क्रान्तोऽस्मि मथुरायाः। अहो बलवानयमन्धकारः। सम्प्रति हि -

**लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।**
**असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता।।**

नाहं गन्तुं समर्थः। अये दीपिकालोकः। किन्नु दुरात्मा कंसो ममापक्रमणं ज्ञात्वा दीपिकाभिः परिवृतो मां ग्रहीतुमागतो भवेत्। भवतु! अहमस्य दर्पशमनं करोमि। (*खड्गमुत्क्रोशति*) अहो मार्गम् अपश्यतः मे अपक्रमणहेतोः कुमारेण प्रभा कृता। (*परिक्रम्य*) एषः मार्गः। यावदपक्रामामि। अये इयं भगवती यमुना कालवर्षसम्पूर्णा सन्निहिता। अहो व्यर्थो मे परिश्रमः। किमिदानीं करिष्ये? (*पुरतोऽवलोक्य सविस्मयं*) हन्त! द्विधा छिन्नं जलम्। दत्तो मे भगवत्या मार्गः। (*अवतीर्य*) निष्क्रान्तोऽस्मि यमुनायाः। अये हुङ्कारशब्द इव श्रूयते। (*परिक्रम्य*) व्यक्तं घोषसमीपे वर्तते मन्दभागः। आ, अत्र घोषे मम वयस्यो नन्दगोपः प्रतिवसति। (*सनिःश्वासं*) भो भो न्यग्रोधदेवताः यद्ययं बालो कंसवधार्थं जातश्चेत् मम वयस्यो नन्दगोप एव इहगच्छतु।

(*ततः प्रविशति दारिकां गृहीत्वा नन्दगोपः*)

नन्दगोपः - (*सशोकम्*) दारिके! दारिके! किमिदानीं नो गेहलक्ष्म्यां न रन्त्वा ततो न उज्झित्वा ननु गच्छसि। अद्य ह्यर्धरात्रेऽस्माकं कुटुम्बिन्या प्रसूतेयं च दारी जातमात्रैवापगतप्राणा संवृत्ता। श्वोऽस्माकं घोषस्योचितम् इन्द्रयज्ञो नामोत्सवो भविष्यति। तद् मा खल्वेतद् दुःखं गोपजनैरनुभूयमानम् इति मयैकाकिना दारिकां गृहीत्वा निर्गतोऽस्मि। यशोदापि तपस्विनी नैव जानाति दारको वा दारिका वा प्रसूत इति मोहं गता। दारिके! दारिके!

वसुदेवः - (*आकर्ण्य*) कोनु खल्वयं रात्रौ परिदेवयति। अस्मत्सब्रह्मचारी खल्वयं तपस्वी। (*कर्णं दत्वा*) स्वरेण प्रत्यभिजानामि। मम वयस्येन नन्दगोपेन भवितव्यम्। वयस्य नन्दगोप! इतस्तावत्।

नन्दगोपः - अम्मो! स्वरयोगेन भर्ता वसुदेव इति जानामि। एतेन कंसस्य राज्ञो वचनं श्रुत्वा कशाभिस्ताडयित्वा निगलैः बद्धोऽस्मि। तन्न गमिष्यामि। अथवा धिङ् मे नृशंसभावम्। एषः मम दुःखे दुःख्यति सुखे सुखी भवति। यावदुपसर्पामि। (*उपसृत्यावलोक्य च स्वगतम्*)। एष भर्ता वसुदेवो दारकं गृहीत्वा स्थितः (*प्रकाशं*) जयतु भर्ता जयतु।

वसुदेवः - वयस्य ननु त्वमपि जानासि दुरात्मना कंसेन मम षट्पुत्राः निधनमुपानीताः इति।

नन्दगोपः - जानामि भर्तः जानामि।

वसुदेवः - तत् सप्तमोऽयं दीर्घायुः। नास्ति मम पुत्रेषु भाग्यम्। तव भाग्याज्जीवितुं गृह्यताम्। (मृतां दारिकां सूचयित्वा) काष्ठभूतं कलेबरं त्यज्यताम्।

नन्दगोपः - यद् भर्ता आज्ञापयति। (तथा करोति गृह्णाति च।) कंसो वा कंसस्य पिता उग्रसेनो वा भवतु, रक्षयामि एनं सर्वथा। कि बहुना सोऽस्माकं घोषपतिर्भवति।

वसुदेवः - वयस्य! प्रभाता रजनी। प्रतिनिवर्त्ततां भवान्।

नन्दगोपः - यद् भर्ता आज्ञापयति। (*निष्क्रान्तः*)

वसुदेवः - निर्गतो नन्दगोपः। यावदहमपि मथुरामेव यास्यामि। (*कर्णं दत्वा*) रुदितशब्द इव श्रूयते। (*परिक्रम्यावलोक्य च*) अये प्रत्यागतप्राणेयं दारिका। यावदिमां गृहीत्वा देवक्याः हस्ते निक्षिप्य दुरात्मानं कंसं वञ्चयामि। (*दारिकां गृहीत्वा निष्क्रान्तः*)

(*यवनिका*)

**पदार्थाः**

| | | |
|---|---|---|
| अवतीर्णः | - | अवतारं कृतः (अधोभागं प्राप्तः) भूलोकं प्राप्तः इत्याशयः। |
| आलोकः | - | प्रकाशः |
| ***रक्षमाणा*** | - | ***रक्षन्निति साधुप्रयोगः। रक्षमाणा इति प्रयोगः भासस्य निरङ्कुशत्वं सूचयति।*** |
| दारिका | - | पुत्री |
| दारकः | - | पुत्रः |
| कृतसंज्ञम् | - | कृतनामधेयम्। |
| अर्धरात्रम् | - | (अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः) अर्धरात्रमिति प्रयोगेण भासस्य पाणिनेः प्राक्तनत्वं सूच्यते इति केचन अभिप्रयन्ति। |
| अपक्रामामि | - | आदाय गच्छामि। . |
| शशाङ्कः | - | चन्द्रः |

**श्लोकः - १ लिम्पतीव तमोऽङ्गानि......**

**अन्वयः - तमः अङ्गानि लिम्पतीव नभः अञ्जनं वर्षतीव असत्पुरुषसेवा इव मे दृष्टिः निष्फलतां गता।**

**सारम् - अन्धकारः शरीरे सर्वत्र लेपनं करोतीव, तदा आकाशम् अञ्जनवृष्टिं करोतीव। तादृशेन घनान्धकारेण व्याप्तं सर्वत्र। यथा दुष्टजनसेवा निष्फला तथा मदीयदृष्टिः अपि व्यर्थतां प्राप्ता च, न किमपि पश्यति इत्याशयः।**

उत्क्रोशति - उद्धरति (कोशात् उद्धरति)

कालवर्षसम्पूर्णा - वृष्टिजलसम्पूर्णा इत्याशयः। कालवर्षेण सम्पूर्णा।

**विग्रहः**

निष्फलताम् - निर्गतं फलं यस्मात् तत्। तस्य भावः ताम्।

कृतसंज्ञम् - कृता संज्ञा यस्य तम्।

शशाङ्कः - शशः अङ्कः यस्य सः, शशः अङ्के यस्य सः वा।

अर्धरात्रम् - अर्धं रात्रेः अर्धरात्रः।

असत्पुरुषसेवा - न सन् असन् असन्चासौ पुरुषश्च असत्पुरुषः तस्य सेवा।

**धातुपरिचयः**

अपक्रामामि - अप पूर्वक क्रम् पादविक्षेपे इति धातोः लट् परस्मैपदी उ. पु ए. व.।

आनय - आङ् पूर्वक णीञ् प्रापणे इति धातोः लोट् म. पु. ए. व.।

**अमरकोशः**

रात्रिः - निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा।
विभावरीतमस्विन्यौ रजनी यामिनी तमी।।

तमः - अन्धकारस्तमो ध्वान्तम्।

नगरम् - पूः पुरी नगरी पत्तनं पुटभेदनम्।

प्रभा - स्युः प्रभा रुट् त्विट् भा भास् छविद्युतिदीप्तयः।

पुत्रः - आत्मजस्तनयस्सूनुः सुतः पुत्रः।

शशाङ्कः - हिमांशुश्चन्द्रमा चन्द्रो इन्दुः कुमुदबान्धवः।

विष्णुः - विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः।

घोषः - घोषः आभीरपल्ली स्यात् पक्कणः शबरालयः।

## पठनप्रवर्तनानि।

- **पाठभागात् नूतनपदानि सञ्चिनुत। तेषामर्थं च कोशसाहाय्येन निर्धारयत। तानि स्वकीये शब्दकोशे निवेशयत।**
- **नाटकांशं पठित्वा सन्धियुक्तपदानि समस्तपदानि चित्वा विश्लेषयत। विग्रहवाक्यं च लिखत।**

**श्रद्धेयाः अंशाः।**

- पाठभागवाचनम्।
- समस्तपदचयनम्।
- विग्रहवाक्यलेखनम्।

- **नाटकं गद्यरूपेण परिवर्त्य लिखतु।**

**श्रद्धेयाः अंशाः।**

- पाठभागवाचनम्।
- आशयमधिकृत्य चर्चा।

- आशयबिन्दूनां क्रोडीकरणम्।
- गद्यरूपेण परिवर्तनं लेखनं च।

❖ **युष्मदभीष्टं कथापात्रमधिकृत्य एकां खण्डिकां लिखत।**

**श्रद्धेयाः अंशाः।**

- पाठभागवाचनम्।
- कथापात्राण्यधिकृत्य चर्चा।
- स्वरूपितानामाशयानां क्रोडीकरणम्।
- लेखनम्।

❖ **नाटकेऽस्मिन् मातृपितृभावयोः वाङ्मयचित्रं कियदास्वादजनकमिति चर्चां कृत्वा टिप्पणीं लिखत।**

**श्रद्धेयाः अंशाः।**

- पाठभागवाचनम्।
- चर्चा।
- उचितसन्दर्भमधिकृत्य आशयस्वरूपीकरणम्।
- आस्वादनलेखनम्।

❖ **नाटकं कक्ष्यायाम् अवतारयतु।**

**श्रद्धेयाः अंशाः।**

- पात्रनिर्धारणं पाठ्यांशानां पात्रानुसारेण वर्गीकरणम्।
- सम्भाषणपरिशीलनम् (व्यक्तिशः)।
- सङ्घे पात्राणां साभिनयप्रकाशनम्।
- नाटकावतारणम्।

पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम्* | क्लेशनिर्देशः |
|---|---|---|---|---|
| 1. | पदकोशरचना कृता | | | |
| 2. | संश्लिष्टपदानि विश्लेषितानि | | | |
| 3. | समस्तपदानि चितानि | | | |
| 4. | गद्यरूपेण परिवर्तितम् | | | |
| 5. | खण्डिका लिखिता | | | |
| 6. | आस्वादनटीका लिखिता | | | |
| 7. | नाटकम् अवतारितम् | | | |

*भागिकतया कृतं चेत् कथं पूर्णं कृतम् इति संस्थया सूचयतु।

१. अध्यापकसाहाय्येन।

२. ग्रन्थसाहाय्येन।

३. छात्राणां साहाय्येन।

४. इतरेषां साहाय्येन।

## अधिकविस्तरः।

# महाभारतान्तर्गतहरिवंशकथायाः नाटककथांशस्य भेदः।

यद्यपि बालचरितस्यावलम्बग्रन्थः हरिवंशस्तथापि भासेन नाटकान्तरेष्विव बालचरितेऽपि कथांशे क्वचित्क्वचित् विपर्यासः कृतः।

हरिवंशे वसुदेवः कृष्णमादाय रात्रौ व्रजं प्राप्य तत्र प्रसूत्यनन्तरं मोहमुपगतायाः यशोदादेव्याः समीपे तं समर्प्य तस्याः पुत्रीं योगमायां मथुरामानयति च।

बालचरिते तु वसुदेवः कंसात्कृष्णं त्रातुं तमादाय मथुरायाः बहिरागच्छति। मध्येमार्गं श्मशाने क्वचित् मृतदारिकां गृहीत्वा आगतं नन्दगोपं पश्यति। पूर्वं करदाने विलम्बितं तं कंसाज्ञया वसुदेवः कशाभिस्ताडितवान् बद्धवान् चासीत्। अतः एव वसुदेवाभ्याशे गन्तुं सः प्रथमतः नेच्छति। परन्तु शपथे कृते सः वसुदेववाक्यानुसारं तं दारकं स्वीकरोति। तदाज्ञया स्वदारिकां मृतामिति विचिन्त्य श्मशाने त्यजति च। नन्दे निर्गते दारिकायाः रोदनं श्रुत्वा वसुदेवः तां सजीवां ज्ञात्वा कंसं वञ्चयितुं तामादाय मथुरां प्रस्थितवांश्च।

## नाटकसङ्केतानि।

**रूपकलक्षणम्** - 'रूपारोपात्तुरूपकम्' इति धनञ्जयः।
रामादीनां रूपं नटे अरोप्यते इति रूपकम्।

**रूपकभेदाः** - नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश।।

**सूत्रधारः** - आसूत्रयन् गुणान्नेतुः कवेरपि च वस्तुनः
रङ्गप्रसाधनप्रौढः सूत्रधार इहोच्यते।। इति सूत्रधारलक्षणम्।
(सूत्रं धरतीति सूत्रधारः। सूत्रं नाटकप्रयोगः)

**नान्दी** - नन्दन्ति देवताः अस्याम् इति नान्दी।
"आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते
देवद्विजनृपादीनां तस्मान्नान्दीति कीर्तिता।।"

इतरनाटककारानपेक्ष्य भासनाटकेषु नान्द्यन्ते एव सूत्रधारप्रवेशः। नाटकान्तरेषु रङ्गं प्रविष्टः सूत्रधारः आशीर्न्नमस्क्रियावस्तुनिर्देश रूपेण नान्दीं करोति।

**स्थापना** - भासनाटकेषु स्थापनेति संज्ञया प्रस्तावना निवेशिता।

नटी विदूषको वापि पारिपार्श्विक एव वा।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते।
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा।

**स्वगतम्** - सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं स्मृतम्।

**जनान्तिकम्** - द्वयोर्मध्ये रहस्यभाषणम्। कर्णे वदति इव।

(अपवार्य भाषणम्)

## भासप्रशस्तिपराः सूक्तयः।

हर्षचरिते - सूत्रधारकृतारंभैः नाटकैर्बहुभूमिकैः।
सपताकैर्यशो लेभे भासो देवकुलैरिव।।

प्रसन्नराघवे - यस्याश्चारेश्चिकुरनिकरो भामयूखो मयूखः
भासो हासः कविकुलगुरुः कालिदासो विलासः।
हर्षो हर्षः हृदयवसति पञ्चबाणस्तु बाणः
केषां नैषा भवतु कविताकामिनी कामुकानाम्?
(भासः सरस्वत्याः हासः इति सारः।)

कालिदासः - प्रथितयशसां भाससौम्मिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य क्रियायां कथं बहुमानः।

क्षेमेन्द्रः - भासनाटकचक्रेऽस्मिन् छेकैः क्षिप्ते परीक्षितुम्।
स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः।।

# विनोदकणिकाः।

**काव्यशास्त्रविनोदेन**
**कालो गच्छति धीमताम्।**
**व्यसनेन च मूर्खाणां**
**निद्रया कलहेन वा।।**

साहित्यविनोदानि बहूनि सन्ति संस्कृतसाहित्यप्रपञ्चे। चतुःषष्टिकलासु तान्यन्तर्भवन्ति। प्रहेलिकारचना, समस्यापूरणं, चाटुश्लोकव्यख्यानमादयः साहित्य-विनोदेष्वतीव प्रधानाः। चाटुश्लोकरचना व्याख्यानं च कस्य मनसि न सन्तोषं जनयेत्?

पठाम, आनन्दम् अनुभवाम काव्यपठनेन।

६

# विनोदकणिकाः।

## चाटुश्लोकाः

चिन्तोद्दीपकाः नर्मोक्तयः भवन्ति चाटुश्लोकाः। चाटूक्तिर्नर्मभाषणम् इति तल्लक्षणम्। केषुचित् चाटुश्लोकेषु प्रश्नानाम् उत्तराणि तत्रैव निगीर्णानि भवन्ति। चाटुश्लोकाः विनोदाय, साहित्याभिरुचिवर्धनाय चिन्तोद्दीपनाय च स्वीक्रियन्ते।

**1. विना गोरसं को रसो भोजनानां**
**विना गोरसं को रसो भूपतीनाम्।**
**विना गोरसं को रसः कामिनीनां**
**विना गोरसं को रसः पण्डितानाम्।।**

गोः-
तक्रदध्यादयः।
भूमिः।
भ्रकुटीक्षेपः।
वाग्मिता।

**अन्वयः** - गोरसं विना भोजनानां कः रसः? गोरसं विना भूपतीनां कः रसः? गोरसं विना कामिनीनां कः रसः? गोरसं विना पण्डितानां कः रसः?

**व्याख्या** - अत्र गो शब्दस्य चत्वारः अर्थाः। श्लोके प्रथमपादस्थितस्य गो शब्दस्य धेनुः इत्यर्थः। तत्र गोरस शब्देन तक्र - दधि - क्षीरादयः गोरसा गृह्यन्ते। द्वितीयपादे गोरसशब्दस्य सस्यसमृद्धा भूः इत्यर्थः। तृतीयपादगतस्य गोशब्दस्य नेत्रमित्यर्थः। तत्र गोरसशब्देस्य नेत्रविलासः इत्यर्थः। चतुर्थपादे गोशब्दस्य वाक् इत्यर्थः। एवं गोरसशब्दस्य वाक्चातुर्यं वाग्मिता च अर्थः। भोजनं - भक्षणम्। भुवः पति भूपतिः राजा इत्यर्थः। कामिनी - सुन्दरी। पण्डितः - ज्ञानी। पण्डा अस्य सञ्जाता इति - पण्डितः। भुजङ्गप्रयातवृत्तम्। 'भुजङ्गप्रयातं भवेद्यैश्चतुर्भि' रिति तल्लक्षणात्।

"स्वर्गेषुपशुवाग् वज्रदिङ्नेत्रघृणि (किरणम्) भूजले
लक्ष्यदृष्ट्या स्त्रियां पुंसि"।।

गो शब्दस्य नानार्थाः स्वर्ग - इषु - वाक् - वज्र - दिक् - नेत्र - घृणि - भू - जलम् इत्यादयः। गो शब्दस्य उभयलिङ्गत्वम्।

**सारांशः** - भोजनवेलायां तक्रादिकं नास्ति चेत् भोजनं स्वादु न स्यात्। राज्ये सस्यसम्पत्समृद्धिः नास्ति चेत् राज्ञां सुखं न स्यात्। कामिनीनां नेत्रसौन्दर्यं नास्ति चेत् ताः न मान्याः स्युः। पण्डितानां वाक्चातुरी नास्ति चेत् को रसः? इति भावः।

**2. कः खे चरति ? का रम्या ?**
**किं जप्यं ? किन्नु भूषणम्।?**
**को वन्द्यः ? कीदृशी लङ्का ?**
**वीरमर्कटकम्पिता।।**

विः
रमा ऋक् कटकम् पिता

**अन्वयः** - कः खे चरति? का रम्या? जप्यं किम्? भूषणम् किम्? वन्द्यः कः? लङ्का कीदृशी? (एषाम् उत्तरत्वेन चतुर्थपादः दत्तः) - वीरमर्कटकम्पिता इति।

अत्र वीरमर्कटकम्पिता इति पदे आद्यानां पञ्चानां प्रश्नानाम् उत्तराण्यपि वर्तन्ते। एतत्पदं विश्लिष्य एकैकस्य प्रश्नस्य उत्तरं यथाक्रमं स्वीकर्तव्यम्। एवं भवति यत् - विः - रमा - ऋक् - कटकं - पिता।

**सारांशः** - कः खे चरति - विः (पक्षी)। का रम्या? - रमा किं जप्यम्? - ऋक्। किं भूषणं? - कटकम्। कः वन्द्यः? - पिता। विर् (:) रमा वीरमा - ऋक् - वीरमर्क्, कटकं - पिता। लङ्का कीदृशी? - वीरमर्कटकम्पिता। अत्र क् इत्यस्य लोपः।

**3. एका भार्या प्रकृतिचपला निश्चला च द्वितीया**
**पुत्रोऽनङ्गस्त्रिभुवनजयी मन्मथो दुर्निवारः।**
**शेषः शय्या वसतिरुदधिर्वााहनं पन्नगारिः**
**स्मारं स्मारं स्वगृहचरितं दारुभूतो मुरारिः।।**

**अन्वयः** - एका भार्या प्रकृतिचपला द्वितीया निश्चला च। पुत्रः अनङ्गः मन्मथः त्रिभुवनजयी दुर्निवारः च। शेषः शय्या उदधिः वसतिः पन्नगारिः वाहनम्। एवं स्वगृहचरितं स्मारं स्मारं मुरारिः दारुभूतः (बभूव)च।

**व्याख्या** - प्रकृतिचपला प्रकृत्या चपला, स्वभावेन अस्थिरा। अनङ्गः न विद्यते अङ्कः यस्य सः। मन्मथः - कामदेवः। "मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः।" पन्नगः - सर्पः। अरिः - शत्रुः। पन्नगारिः - गरुडः। गरुत्मान् गरुडस्तार्क्ष्यः वैनतेयो खगेश्वरः। स्मारं स्मारं - ध्यायं ध्यायं, ध्यात्वा ध्यात्वा। (णमुल्प्रत्ययः, णमुलन्तं मान्तमव्ययम्) दारुभूतः - काष्ठखण्डवत् स्थितः इत्यर्थः - जडीभूतः इति भावः।

**सारांशः** - मुरारेः एका भार्या लक्ष्मीः चञ्चला, द्वितीया भार्या भूमीदेवी निश्चला च। पुत्रः मन्मथःअनङ्गः अङ्गरहितः त्रिभुवनजेता तु न केनापि ताडनेन वारयितुं शक्यः। शय्या तु आदिशेषः। वाहनं तु सर्पभक्षकः गरुडः च। एवं स्वभवनचरितं स्मृत्वा स्मृत्वा मुरारिः दारुभूतः जातः इति भावः। (अनर्घराघवं नाम नाटकस्य कर्तुः मुरारेः वृत्तान्तोऽपि अस्मिन् श्लोके सूच्यते। सः गुरुकुलक्लिष्टः साहित्यकुशलः अपि आसीत्। साहित्यसमाजे समर्हं स्थानम् अलब्ध्वा, दुखितः मुरारिः पारिवारिकचिन्तया दारिद्र्यादि दुःखेन च नितरां दूयमानः आसीत्। कदाचित् नष्टसंज्ञः इव इतस्ततः भ्रमन् कालमनयत् इत्ययं वृत्तान्तः 'स्मारं स्मारं स्वगृहचरितं दारुभूतो मुरारिः' इति पङ्क्त्या अभिव्यक्तो भवति।)

**4. एकदा रामचन्द्रस्य**
**लालयन्ती पदाम्बुजम्।**
**झटित्युन्मुच्य चिक्षेप**
**सीता रत्नाङ्गुलीयकम्।।**

**अन्वयः** - एकदा रामचन्द्रस्य पदाम्बुजं लालयन्ती सीता झटिति रत्नाङ्गुलीयकम् उन्मुच्य चिक्षेप।

**पदच्छेदः** - झटित्युन्मुच्य - झटिति + उन्मुच्य।

**सारांशः** - एकस्मिन् दिने सीता श्रीरामस्य पादयोः लालनसमये अङ्गुलीयकरत्नस्थाने स्वप्रतिबिम्बं दृष्ट्वा - सपत्नीम्, अन्यां स्त्रियं मन्वाना तदङ्गुलीयकं मोचयित्वा क्षिप्तवतीति भावः।

(अत्र अर्थान्तरं प्रतीयते यथा पुरा सीतास्वयंवरार्थं गतस्य रामस्य पादस्पर्शेनैव बहुकालात्पूर्वं शिलात्वमुपपन्नायाः अहल्यायाः दिव्यसौन्दर्यवत् स्त्रीरूपं लब्धम्। तत् स्मृत्वा अधुना स्वस्य अङ्गुलीरत्नं रामपादस्पर्शेन दिव्यस्त्री स्यादिति अचिन्तयत्। पुनः मम सापत्न्यदुःखं भवेदिति तदङ्गुलीयकमेव विमुच्य दूरतः क्षिप्तवतीति।)

**5. यस्य षष्ठी चतुर्थी च**
**विहस्य च विहाय च।**
**अहं कथं द्वितीया स्यात्**
**द्वितीयास्यामहं कथम्।।**

**रामस्य - षष्ठी**
**विहस्य - लयबन्तम्।**
**रामाय - चतुर्थी**
**विहाय - लयबन्तम्।**

**अन्वयः** - अहम् - इति द्वितीया कथं स्यात्? यस्य, विहस्य इति षष्ठी, विहाय इति चतुर्थी च भवति, तस्य पुरुषस्य अहं द्वितीया कथं स्याम्?

**व्याख्या** - विहस्य विहाय च अव्ययपदे। अत्र द्वितीया इत्यस्य भार्या इत्यर्थः।

**सारांशः** - यस्य पुरुषस्य अभिप्राये विहस्य इति षष्ठी एवं विहाय इति चतुर्थी च भवतः, यस्य, अहम् इति पदं द्वितीयाविभक्तिः च भवति, तादृशस्य पुरुषस्य भार्या अहं कथं भवेयम् इति भावः।

**कोशः**

भूपतिः - राज्ञि राट् पार्थिव क्ष्माभृन्नृपभूप महीक्षितः।

कामिनी - विशेषस्त्वङ्गना भीरुः कामिनी वामलोचना।

पण्डितः - धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः।

खं - नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम्।

भूषणम् - अलङ्कारस्त्वाभरणं परिष्कारो विभूषणं। मण्डनं च।

मर्कटः - प्लवङ्गः प्लवगशाखामृगवलीमुखाः मर्कटो वानरः कीशो वनौकाः।।

अनङ्गः - कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः।

# पठनप्रवर्तनानि।

- **नूतनपदानि सञ्चिनुत। कोशसहायेन अर्थं निर्धारय। स्वकीये पदकोशे अकारादिक्रमेण तानि सन्निवेशयत।**

  **श्रद्धेयाः अंशाः।**

  - पाठ्यांशानां वाचनम्।
  - शब्दकोशसाहाय्येन अर्थचयनम्।
  - लघुकोशनिर्माणम्।

- **संश्लिष्टपदानि सञ्चिनुत। सन्धिविश्लेषणं कुरुत।**

  **श्रद्धेयाः अंशाः।**

  - वाचनम्।
  - सन्धियुक्तपदानां चयनम्।
  - लेखनम्।

- **समस्तपदानि सञ्चिनुत। विग्रहवाक्यं लिखत।**

  **श्रद्धेयौ अंशौ।**

  - वाचनम्।
  - समस्तपदानां चयनम्।

- **अन्यान् कांश्चित् चाटुश्लोकान् सञ्चिनुत।**

  **श्रद्धेयाः अंशाः।**

  - पाठ्यांशानां वाचनम्।
  - चर्चाद्वारा आशयानां लेखनम्। आस्वादनं च।
  - नूतनचाटुश्लोकानां क्रोडीकरणम्।

❖ **'साहित्यविनोदोपाधिरूपेण चाटुश्लोकानां प्रसक्तिः' विषयेऽस्मिन् चर्चां कृत्वा टिप्पणीं च लिखत।**

**पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् * | क्लेशनिर्देशः |
|---|---|---|---|---|
| 1. | पदकोशरचना कृता | | | |
| 2. | सन्धिकोशरचना कृता | | | |
| 3. | विग्रहकोशरचना कृता | | | |
| 4. | चाटुश्लोकचयनम् कृतम् | | | |
| 5. | चर्चा कृता | | | |

*भागिकतया कृतं चेत् कथ पूर्णं कृतम् इति संख्यया सूचयतु।

१. अध्यापक साहाय्येन।

२. ग्रन्थ साहाय्येन।

३. छात्राणां साहाय्येन।

४. इतरेषां साहाय्येन।

# मन्त्रोक्तिः।

**काव्यम् यशसेऽर्थकृते।**
**व्यवहारविदे शिवेतरक्षतये।**

**सद्यः परनिर्वृतये।**
**कान्तासम्मिततयोपदेशयुजे।।**

संस्कृतसाहित्यस्य जीवातभूतं भवति महाकाव्यम्। बहवः कवयः महाकाव्यानि विरच्य भाषादेवीमर्चयामासुः। रघुवंशकुमारसंभवमाधकिरातनैषधाख्यानि पञ्चमहाकाव्यानि। जानकीहरणभट्टिकाव्यादीनि इतराणि शास्त्रकाव्यानि च सन्ति।

महाकाव्यप्रस्थाने महान्तं स्थानमावहन्ति केरलीयानां महाकाव्यानि। नारायणभट्टपादवासुदेवसुकुमारादयो प्राचीनाः केरलीयाः संस्कृत- कवयः। तेषां धातुकाव्य-युधिष्ठिरविजय-श्रीकृष्णविलासादीनि प्रसिद्धानि महाकाव्यानि। तेषु सारल्येन प्रथमं स्थानम् अर्हति, सुकुमारकविविरचितं श्रीकृष्णविलासम्।

महाकाव्यपठनेन सद्यःपरनिर्वृतिं प्राप्नुयाम।

७

# मन्त्रोक्तिः।

## काव्यम्

संस्कृतसाहित्ये समादरणीयं स्थानमलङ्करोति श्रीकृष्णविलासं नाम काव्यम्। काव्यस्यास्य कथावस्तु श्रीमद्भागवतस्य दशमस्कन्धात् स्वीकृतम्। काव्यमिदं केरलेषु काव्यान्तरापेक्षया बहुप्रचरितमस्ति। सौकुमार्य - समता - प्रसाद - माधुर्य - अर्थव्यक्त्यादयो गुणाः अस्मिन् सामञ्जस्येन समन्विताः। द्वादशसर्गात्मकमिदं काव्यम् अपूर्णं भवति। केरलीयेन सुकुमारकविना विरचितस्यास्य काव्यस्य अपूर्णतायाः हेतुम् ऐतिह्यविदः एवं प्रतिपादयन्ति।

गुरोः निर्दयशासनम् असहमानः सुकुमारो नाम बालः गुरुं हन्तुं निरचिनोत्। तदर्थं शिलाखण्डपातेन गुरुं हन्तुमभिलषन् सः रात्रौ अट्टे निलीय अतिष्ठत्। तदानीं गुरोः गुरुपत्नीं प्रति भाषणं श्रुत्वा गुरुः स्वस्मिन् अतिस्नेहवान् इति सः अजानात्। तदा पश्चात्तापपरवशः सः गुरुवधोद्यमपापपरिहारार्थं तुषाग्नौ आत्मानं जुहाव। अग्नौ स्थित्वा रचितस्यास्य काव्यस्य समापनात्पूर्वं जिह्वामूलव्याप्तवह्निः निवृत्तवाग्व्यापारोऽभूत् इति।

काव्यस्यास्य तृतीयसर्गाद् उद्धृतेषु सप्तदशसु श्लोकेषु सचिवानां पुरतः कंसस्य मन्त्रणं तेषां प्रतिवचनञ्च प्रतिपादितम्।

कंसस्य सचिवसभा।

**1. प्रातः प्रलम्बप्रमुखानमात्यान्**
**सर्वान् समाहूय स भोजराजः।**
**सविभ्रमप्रेरितदृष्टिदत्ते**
**स्थाने निषण्णानवदद्विनीतः।।**

किं अवदत् ?

**पदच्छेदः** - स भोजराजः - सः भोजराजः।
अवदद्विनीतः - अवदत् + विनीतः।

| ***अन्वयः*** | | ***अर्थः*** |
|---|---|---|
| सः भोजराजः | - | सः कंसः |
| प्रातः (अव्ययं) | - | प्रभाते |
| प्रलम्बप्रमुखान् अमात्यान् | - | प्रलम्बादीन् प्रमुखान् सचिवान् |
| सर्वान् | - | समस्तान् |
| समाहूय (ल्यबन्तमव्ययम्) | - | आह्वानं कृत्वा |
| सविभ्रमप्रेरितदृष्टिदत्ते स्थाने | - | सविलासदृष्ट्या कल्पिते स्थाने |
| निषण्णान् (तान्) | - | उपविष्टान् (सचिवान्) |
| विनीतः | - | विनयसम्पन्नः सन् |
| अवदत्। | - | अब्रवीत्। |

**सारः** - सः कंसः प्रभाते एव प्रलम्बारिष्टकेशिधेनुकादीन् सचिवान् सर्वान् आहूय विलासपूर्वकदृष्ट्या निर्दिष्टे स्थाने उपविष्टान् (मन्त्रिणः) विनयसम्पन्नः सन् अवदत्।

**विग्रहः** - भोजराजः - भोजानां राजा।
प्रलम्बप्रमुखान् - प्रलम्बः प्रमुखः येषां तान्।

| | | |
|---|---|---|
| सविभ्रमप्रेरितदृष्टिदत्ते | - | सविभ्रमं यथा तथा प्रेरितया दृष्ट्या दत्ते। |
| सविभ्रमम् | - | विभ्रमेण सह वर्तते यस्मिन् कर्मणि तद्यथा तथा। |

**धातुपरिचयः**

अवदत् - वद् व्यक्तायां वाचि धातुः लङ् परस्मैपदि प्र. पु. ए. व.।

अवदत् अवदताम् अवदन्।

लट् - वदति।

**व्याकरणविशेषः**

भोजराजः - **राजन् शब्दः तत्पुरुषसमासान्ते टचि अकारान्तः भवति। 'राजाहःसखिभ्यष्टच्'।**

**2. सन्दिह्य मोहाद्वसुदेववाक्यं**
**मया प्रमाणीकृतभूतवाचा।**
**हता नृशंसेन सुता भगिन्याः**
**तेनाविलं मे हृदयं यशोऽपि।।**

**पदच्छेदः** -

| | | |
|---|---|---|
| मोहाद्वसुदेववाक्यम् | - | मोहात् + वसुदेववाक्यम्। |
| तेनाविलम् | - | तेन + आविलम्। |
| यशोऽपि | - | यशः + अपि। |

| ***अन्वयः*** | | ***अर्थः*** |
|---|---|---|
| प्रमाणीकृतभूतवाचा | - | अशरीरिवाणीं यथार्थं मन्यमानेन |
| नृशंसेन मया | - | क्रूरेण मया |
| मोहात् | - | अज्ञानात् |
| वसुदेववाक्यम् | - | वसुदेवस्य वाक्यम् |

| | | |
|---|---|---|
| सन्दिह्य (ल्यबन्तमव्ययं) | - | विशङ्क्य |
| भगिन्याः | - | सहोदर्याः |
| सुताः | - | पुत्राः |
| हताः | - | मारिताः |
| तेन | - | तेन हेतुना |
| मे हृदयं यशः अपि | - | मम मनः कीर्तिः च |
| आविलम् | - | कलुषम् (अभवत्)। |

**सारः** - अशरीरिवाणीं प्रमाणीकृत्य क्रूरेण मया अज्ञानात् वसुदेवस्य वाक्यं सन्दिह्य सहोदर्याः षट् पुत्राः मारिताः। तेन कारणेन मम हृदयं यशः अपि कलुषम् अभवत्।

**विग्रहः** - प्रमाणीकृतभूतवाचा - न प्रमाणम् अप्रमाणम्, अप्रमाणं प्रमाणं सम्पद्यमानं कृता, प्रमाणीकृता, प्रमाणीकृता भूतवाक् येन तेन।

वसुदेववाक्यम् - वसुदेवस्य वाक्यम्।

**प्रयोगः** - मया सुताः हताः - कर्मणि।

अहं सुतान् हतवान् - कर्तरि।

**सुबन्तपरिचयः**

यशः - स. न. पु. प्र. ए. व.।

यशः यशसी यशांसि

**3 जातां पुनः काञ्चन काञ्चनाभां**
**सुतां गतायुर्निशि हन्तुमैच्छम्।**
**उत्प्लुत्य सा व्योम्नि जवादतिष्ठ-**
**च्छस्त्रोत्कटा दर्शितदिव्यरूपा।।**

**पदच्छेदः** - गतायुर्निशि - गतायुः + निशि।

जवादतिष्ठच्छस्त्रोत्कटा - जवात् + अतिष्ठत् + शस्त्रोत्कटा।

| ***अन्वयः*** | | ***अर्थः*** |
|---|---|---|
| पुनः | - | अनन्तरम् |
| गतायुः (अहम्) | - | आसन्नमृत्युः (अहम्) |
| निशि | - | रात्रौ |
| जाताम् | - | जनिं प्राप्तां |
| काञ्चनाभां | - | काञ्चनप्रभां |
| कांचन (अव्ययं) | - | कामपि |
| सुतां | - | पुत्रीं |
| हन्तुम् (तुमुन्नन्तं) | - | मारयितुम् |
| ऐच्छम् | - | अहम् अवाञ्छम् |
| सा | - | सा सुता |
| जवात् | - | तरसा |
| उत्प्लुत्य (ल्यबन्तमव्ययं) | - | करात् ऊर्ध्वं गत्वा |
| दर्शितदिव्यरूपा | - | दिव्याकृतिं प्रदर्श्य |
| शस्त्रोत्कटा | - | आयुधैः भीषणा |
| व्योम्नि | - | आकाशे |
| अतिष्ठत् | - | स्थितवती। |

**सारः** - अनन्तरं गतायुः अहं जनिमुपगतां काञ्चनप्रभां कामपि पुत्रीं निशायां मारयितुम् अवाञ्छम्। सा दिव्याकृतिः भूत्वा उद्गम्य विविधायुधैः भीषणा सती आकाशे स्थितवती।

**विग्रहः** - काञ्चनाभाम् - काञ्चनस्य इव आभा यस्याः ताम्।

दर्शितदिव्यरूपा - दर्शितं दिव्यं रूपं यया सा।

गतायुः - गतम् आयुः यस्य सः।

**धातुपरिचयः**

ऐच्छम् - इष इच्छायां धातुः लङ् प. प. उ. पु. ए. व.।

ऐच्छम् ऐच्छाव ऐच्छाम। लट् इच्छति।

अतिष्ठत् - ष्ठा गतिनिवृत्तौ लङ् प. प. प्र. पु. ए. व.।

अतिष्ठत् अतिष्ठताम् अतिष्ठन्। लट् तिष्ठति।

प्रयोगः - सा अतिष्ठत् - कर्तरि।

तया अस्थीयत - भावे।

अहं सुतां हन्तुम् ऐच्छम् - कर्तरि।

मया सुता हन्तुम् ऐष्यत - कर्मणि।

**सुबन्तपरिचयः**

गतायुः - स. पु. प्र. ए. व.।

गतायुः गतायुषौ गतायुषः।

व्योम्नि - न. पु. स. ए. व.।

व्योम्नि/ व्योमनि व्योम्नोः व्योमसु।

**4. नियम्य सा मातुल इत्यमर्षं**
**प्रसेदुषी मामवदच्च बाला।**
**अरिर्महीयानजनिष्ट भूमौ**
**तवोचितं सम्प्रति चिन्तयेति।।**

| | | | |
|---|---|---|---|
| **पदच्छेदः** - | मातुल इति | - | मातुलः + इति। |
| | इत्यमर्षम् | - | इति + अमर्षम्। |
| | अवदच्च | - | अवदत् + च। |
| | अरिर्महीयान् | - | अरिः + महीयान्। |
| | तवोचितम् | - | तव + उचितम्। |
| | चिन्तयेति | - | चिन्तय + इति। |

| ***अन्वयः*** | | ***अर्थः*** |
|---|---|---|
| सा बाला | - | सा बालिका |
| मातुलः इति | - | मातृसहोदरः इति हेतोः |
| अमर्षम् | - | कोपम् |
| नियम्य (ल्यबन्तमव्ययं) | - | निगृह्य |
| प्रसेदुषी | - | प्रसन्ना (सती) |
| महीयान् | - | महत्तरः |
| अरिः | - | शत्रुः |
| भूमौ | - | भुवि |
| अजनिष्ट | - | अजायत |
| सम्प्रति तव उचितं | - | इदानीं तव योग्यं (कार्यं) |
| चिन्तय इति | - | विचारय इति |
| माम् | - | माम् (कंसं प्रति) |
| अवदत् च | - | उक्तवती च। |

**सारः** - सा बालिका मातृसहोदरः इति मत्वा कोपं निगृह्य प्रसन्ना सती मां 'तव महत्तरः शत्रुः भुवि जातः, इदानीम् उचितं विचारय' इति उक्तवती च।

**विग्रहः** - महीयान् - अतिशयेन महान्।

**धातुपरिचयः**

अजनिष्ट - जनी प्रादुर्भावे - आ. प. लुङ् प्र. पु. ए. व.।
अजनि/अजनिष्ट अजनिषाताम् अजनिषत।
लट् जायते।

चिन्तय - चिति स्मृत्याम् - प. प. लोट् म. पु. ए. व.।
चिन्तय/ चिन्तयतात् चिन्तयतं चिन्तयत

**प्रयोगः**

**त्वम् उचितं चिन्तय - कर्तरि।**

**त्वया उचितं चिन्त्यताम् - कर्मणि।**

प्रसेदुषी प्र षद्लृ विशरणगत्यवसादनेषु धातोः क्वसु प्रत्यये प्रसेदिवस् शब्दः स्त्रियां प्रसेदुषी इति रूपम्।प्रसेदिवान् इति पुल्लिङ्गे।

**सुबन्तपरिचयः**

महीयान् - स. पु. प्र. ए. व.।
महीयान् महीयांसौ महीयांसः।

**5. व्याहृत्य मां द्यां प्रति देवनारी-**
**गणैर्गतायामिति सेवितायाम्।**
**देव्यामहं दुश्चरितं स्वमेव**
**स्मरन् विनिद्रो रजनीमनैषम्।।**

**कंसस्य निद्रा कुतो न आगता?**

**पदच्छेदः** - देवनारीगणैर्गतायामिति - देवनारीगणैः + गतायाम् + इति।

| अन्वयः | अर्थः |
|---|---|
| इति मां प्रति | - एवं मां प्रति |
| व्याहृत्य (ल्यबन्तमव्ययं) | - उक्त्वा |
| देवनारीगणैः सेवितायां देव्यां | - देवस्त्रीसमूहैः सेवितायां तस्यां देव्यां |
| द्यां प्रति गतायाम् | - स्वर्गं प्रति यातायाम् सत्याम् |
| अहं स्वं दुश्चरितं | - अहं स्वकीयं दुश्चेष्टितम् |
| स्मरन्नेव | - चिन्तयन् एव |
| विनिद्रः रजनीम् अनैषम् | - निद्राविहीनः रात्रिम् अनयम्। |

**सारः** - एवं माम् उक्त्वा यदा देवनारीगणैः सेविता सा देवी स्वर्गं प्रति गता तदा अहं स्वं दुश्चेष्टितं चिन्तयन्नेव निद्राविहीनः रात्रिम् अयापयम्।

**विग्रहः** - देवनारीगणैः - देवानां नार्यः, तासां गणाः तैः।

विनिद्रः - विगता निद्रा यस्मात् सः।

**धातुपरिचयः**

अनैषम् - णीञ् प्रापणे प. प. लुङ् उ. पु. ए. व.।

अनैषम् अनैष्व अनैष्म।

लट् नयति।

**व्याकरणविशेषः**

देव्यां द्यां प्रति गतायाम्। सति सप्तमी।

द्यां प्रति - **'अभितः परितः समया निकषा हा प्रतियोगेऽपि' इति प्रति योगे द्वितीया।**

**सुबन्तपरिचयः**

द्याम् - ओ. द्यो शब्दः स्त्री. द्वि. ए. व.।

द्यां द्यावौ द्याः।

**6. युद्धेषु देवाः पुरुहूतमुख्याः**
**भग्ना मया स्थातुमशक्नुवन्तः।**
**अश्वान् परित्यज्य विमुच्य नागान्**
**मुक्त्वा च शस्त्राणि दिशो द्रवन्ति।।**

के दिशो द्रवन्ति

**पदच्छेदः** - दिशो द्रवन्ति - दिशः+ द्रवन्ति।

| ***अन्वयः*** | | ***अर्थः*** |
|---|---|---|
| युद्धेषु | - | समरेषु |
| मया भग्नाः | - | मया चूर्णिताः |
| पुरुहूतमुख्याः | - | इन्द्रादयः |
| देवाः | - | सुराः |
| स्थातुम् (तुमुन्नन्तं) | - | स्वस्थाने वर्तितुम् |
| अशक्नुवन्तः (सन्तः) | - | अपारयन्तः (सन्तः) |
| अश्वान् | - | तुरगान् |
| परित्यज्य (ल्यबन्तं) | - | त्यक्त्वा |
| नागान् | - | गजान् |
| विमुच्य (ल्यनबन्तं) | - | परित्यज्य |
| शस्त्राणि | - | आयुधानि |
| मुक्त्वा च (क्त्वान्तम्) | - | त्यक्त्वा च |
| दिशः द्रवन्ति | - | दिगन्तराणि प्रति धावन्ति। |

**सारः** - समरेषु मया पराजिताः इन्द्रादयः देवाः स्वस्थाने वर्तितुम् अशक्ताः तुरगान् गजान् शस्त्राणि च त्यक्त्वा दिगन्तराणि लक्षीकृत्य पलायन्ते।

**विग्रहः** - पुरुहूतमुख्याः - पुरुहूतः मुख्यः येषां ते।

**धातुपरिचयः**

द्रवन्ति - द्रु गतौ - प. प. लट् प्र. पु. ब. व.।
द्रवति द्रवतः द्रवन्ति।

**7.** **तदेषु नैकोऽपि भुवं गतो मे**
**शक्नोति कर्तुं प्रतिकूलभावम्।**
**महीयसः किं घटते परागः**
**समीरणस्याभिमुखं प्रसर्तुम्।।**

**प्रतिकूलभावं कर्तुं कः न प्रभवति**

**पदच्छेदः** - तदेषु - तत् + एषु।
नैकोऽपि - नैकः + अपि।
गतो मे - गतः + मे।
समीरणस्याभिमुखम् - समीरणस्य + अभिमुखम्।

| ***अन्वयः*** | | ***अर्थः*** |
|---|---|---|
| तत् एषु | - | तस्मात् एषु देवेषु |
| नैकः अपि | - | न कोऽपि |
| भुवम् | - | भूमिम् |
| गतः | - | प्राप्तः |
| मे प्रतिकूलभावम् | - | मम प्रातिकूल्यम् |
| कर्तुं (तुमुन्नन्तं) न शक्नोति | - | कर्तुं शक्तः न भवति। |
| परागः | - | (हि) पुष्परेणुः |
| महीयसः समीरणस्य | - | महत्तरस्य वायोः |
| अभिमुखं | - | पुरतः |
| प्रसर्तुम् (तुमुन्नन्तम्) | - | प्रसरणं कर्तुम् |
| किं घटते? | - | किं यतते? (न घटते इति भावः।) |

**सारः** - तेन कारणेन एषु देवेषु मध्ये एकः अपि भूमिं प्राप्य मम विरोधभावं कर्तुं न शक्तः भवति। परागः प्रचण्डवातस्य अभिमुखं प्रसरणं कर्तुं न कदापि यतते।

**धातुपरिचयः**

शक्नोति - शक्लृ शक्तौ - प. प. लट् प्र. पु. ए. व.।
शक्नोति शक्नुतः शक्नुवन्ति।

घटते - घट चेष्टायाम् - आ. प. लट् प्र. पु. ए. व.।
घटते घटेते घटन्ते।

अलङ्कारः - **देवपरागयोः बिम्बप्रतिबिम्बभावात् दृष्टान्तालङ्कारः।**

विग्रहः - नैकः - न एकः। न शब्देन सह समासः। तत्पुरुषः।

**8 किमन्यदार्ताभ्यवपत्तिकामः**
**सुरेषु सन्दर्शितपक्षपातः।**
**अजायतोर्व्यामसुरान्निहन्तुं**
**स एव मन्ये सरसीरुहाक्षः।।**

**पदच्छेदः** - अन्यदार्ताभ्यवपत्तिकामः - अन्यत् + आर्ताभ्यवपत्तिकामः।
अजायतोर्व्याम् - अजायत + उर्व्याम्।
स एव - सः + एव।

| ***अन्वयः*** | | ***अर्थः*** |
|---|---|---|
| आर्ताभ्यवपत्तिकामः | - | आर्तत्राणपरायणः |
| सुरेषु सन्दर्शितपक्षपातः | - | देवेषु प्रकटितस्नेहविशेषः |
| सः सरसीरुहाक्षः एव | - | सः विष्णुः एव |
| असुरान् निहन्तुम् | - | असुरान् उन्मूलयितुम् |

| | | |
|---|---|---|
| उर्व्याम् | - | भूमौ |
| अजायत (इति) | - | जन्म स्वीकृतवान् |
| मन्ये | - | इति अहं चिन्तयामि |
| अन्यत् किम्? | - | अन्यत् किमपि नास्ति। |

**सारः** - आर्तत्राणपरायणः विशिष्य देवेषु प्रकटितस्नेहः सः विष्णुः एव असुरनिग्रहार्थं भुवि जनिं लेभे इति अहं मन्ये। अन्यः कोऽपि न स्यात्।

**विग्रहः** -

| | | |
|---|---|---|
| सरसीरुहाक्षः | - | सरसि रोहति इति सरसीरुहं, सरसीरुहे इव अक्षिणी यस्य सः। |
| आर्ताभ्यवपत्तिकामः | - | आर्तानाम् अभ्यवपत्तिं कामयते इति। |
| सन्दर्शितपक्षपातः | - | सन्दर्शितः पक्षपातः येन सः। |

**धातुपरिचयः**

अजायत - जनी प्रादुर्भावे आ. प. लङ् प्र. पु. ए. व.।
अजायत अजायेताम् अजायन्त।
लट् जायते।

मन्ये - मन अवबोधने आ. प. लट् उ. पु. ए. व.।
मन्ये मन्यावहे मन्यामहे।

**सरसीरुहाक्षः - इकारान्तः अक्षिशब्दः बहुव्रीहिसमासान्ते षचि अकारान्तः भवति।**
**"बहुव्रीहौ सख्थ्यक्ष्णोः स्वाङ्गात् षच्"।**

**9.** **सर्वे वयं दैत्यकुलप्रसूताः**
**केनापि जाता भुवि कारणेन।**
**स तेन सन्नह्यति जेतुमस्मान्**
**उक्तोऽयमर्थः किल नारदेन।।**

नारदेन किं उक्तम्?

**पदच्छेदः** - उक्तोऽयमर्थः - उक्तः + अयम् + अर्थः।

| *अन्वयः* | | *अर्थः* |
|---|---|---|
| वयं सर्वे दैत्यकुलप्रसूताः | - | अस्मदादयः सर्वे असुरकुले प्रसूताः |
| केनापि कारणेन | - | अज्ञातकारणेन |
| भुवि जाताः | - | भूमौ लब्धजन्मानः |
| तेन | - | तेन कारणेन |
| स अस्मान् | - | सः विष्णुः अस्मान् असुरान् |
| जेतुं (तुमुन्नन्तं) | - | विजेतुं |
| सन्नह्यति | - | सन्नद्धो भवति |
| अयम् अर्थः | - | अयं वृत्तान्तः |
| नारदेन उक्तः किल। | - | नारदमहर्षिणा कथितः किल। |

**सारः** - सर्वे वयम् असुरकुले जाताः। अज्ञातकारणेन भूमौ मानुषभावेन जन्म स्वीकृतवन्तः। तेन हेतुना अस्मान् असुरान् विजेतुं सः विष्णुः सन्नद्धो भवति। पूर्वमेव नारदमहर्षिः एनं वृत्तान्तम् उक्तवान् किल।

**विग्रहः** - दैत्यकुलप्रसूताः - दैत्यानां कुलं, तस्मिन् प्रसूताः।

**धातुपरिचयः**

सन्नह्यति - सं + णह् बन्धने प. प. लट् प्र. पु. ए. व.।
सन्नह्यति सन्नह्यतः सन्नह्यन्ति।

**प्रयोगविपरिणामः**

अयमर्थः नारदेन उक्तः। - कर्मणि।

इममर्थं नारदः उक्तवान्। - कर्तरि।

**10. अतस्तदुच्छेदविधौ विनिद्रा**
**यतध्वमद्यैव बलानुरूपम्।**
**नखाग्रलाव्यस्तरुरङ्कुरात्मा**
**परश्वधस्यापि ततोऽतिभूमिः।।**

अतः
किं कर्तव्यम्?

**पदच्छेदः** -

| | | |
|---|---|---|
| अतस्तदुच्छेदविधौ | - | अतः + तदुच्छेदविधौ। |
| अद्यैव | - | अद्य + एव। |
| नखाग्रलाव्यस्तरुरङ्कुरात्मा | - | नखाग्रलाव्यः + तरुः + अङ्कुरात्मा। |
| परश्वधस्यापि | - | परश्वधस्य + अपि। |
| ततोऽतिभूमिः | - | ततः + अतिभूमिः। |

| ***अन्वयः*** | | ***अर्थः*** |
|---|---|---|
| अतः विनिद्राः | - | तेन कारणेन जागरूकाः (सन्तः) |
| तदुच्छेदविधौ | - | तस्य विष्णोः उन्मूलनकर्मणि |
| अद्यैव | - | अस्मात् दिनात्प्रभृत्येव |
| बलानुरूपं यतध्वम्। | - | यथाशक्ति प्रयत्नः कर्तव्यः। |
| अङ्कुरात्मा तरुः | - | अङ्कुरावस्थः वृक्षः |
| नखाग्रलाव्यः | - | नखाग्रेण छेत्तुं शक्यः |
| ततः परश्वधस्य अपि | - | अनन्तरं निशितकुठारस्य अपि |
| अतिभूमिः | - | अविषयो भवेत्। कुठारेण अपि छेत्तुं न शक्यते इति भावः। |

**सारः** - तेन कारणेन यूयं सर्वे जागरूकाः तस्य विष्णोः उन्मूलनकर्मणि सम्प्रत्येव शक्त्यनुसारं प्रयत्नं कुरुत। अङ्कुरावस्थः वृक्षः नखाग्रेण छेत्तुं शक्यः। तदनन्तरं वृद्धिं गतः निशितकुठारेणापि छेत्तुमशक्यो भवेत्।

**विग्रहः** -

| | | |
|---|---|---|
| तदुच्छेदविधौ | - | तस्य उच्छेदस्य विधौ। |
| बलानुरूपम् | - | रूपस्य योग्यम् अनुरूपं, बलस्य अनुरूपम्। |
| विनिद्राः | - | विगता निद्रा येभ्यः ते। |
| नखाग्रलाव्यः | - | नखस्य अग्रः नखाग्रः तेन अवश्यं लवितुं शक्यः। |

**धातुपरिचयः**

यतध्वम् - यती प्रयत्ने - आत्मनेपदी लोट् म. पु. ब. व.।
यतस्व यतेथां यतध्वम्।

**11.** **यस्मिन् भवत्याश्रितवत्सलत्वं**
**विप्रेषु यस्यास्ति विशेषसङ्गः।**
**मनोहरं यश्च बिभर्ति रूपं**
**वधं स बालोऽर्हति मत्सकाशात्।।**

**शत्रु नाशाय किं कर्तव्यम्?**

**पदच्छेदः** -

| | | |
|---|---|---|
| भवत्याश्रितवत्सलत्वम् | - | भवति + आश्रितवत्सलत्वम्। |
| यस्यास्ति | - | यस्य + अस्ति। |
| यश्च | - | यः + च। |
| स बालोऽर्हति | - | सः + बालः + अर्हति। |

| ***अन्वयः*** | | ***अर्थः*** |
|---|---|---|
| यस्मिन् | - | यस्मिन् बाले |
| आश्रितवत्सलत्वं भवति | - | आश्रितेषु जनेषु वात्सल्यं भवति |
| यस्य | - | यस्य बालस्य |

| | | |
|---|---|---|
| विप्रेषु विशेषसङ्गः अस्ति | - | ब्राह्मणेषु विशेषेण आसक्तिः अस्ति |
| यः | - | यः बालः च |
| मनोहरं रूपं बिभर्ति | - | नयनानाम् आनन्दकरम् आकारं धरति |
| सः बालः | - | तादृशः बालः |
| मत्सकाशात् | - | मम करात् |
| वधम् अर्हति | - | हननम् अर्हति। |

**सारः** - यस्मिन् बाले आश्रितेषु जनेषु वात्सल्यं भवति, यस्य बालस्य ब्राह्मणेषु विशेषेण आसक्तिः अस्ति, यः बालः नयनानाम् आनन्दकरम् आकारं धत्ते तादृशः बालः मम हस्ताद् वधम् अर्हति।

**विग्रहः** -

| | | |
|---|---|---|
| आश्रितवत्सलत्वम् | - | वत्सलस्य भावः वत्सलत्वम्, आश्रितेषु वत्सलत्वम् आश्रितवत्सलत्वम्। |
| मनोहरम् | - | हरति इति हरम्। मनसः हरम्। |

**धातुपरिचयः**

| | | |
|---|---|---|
| अर्हति | - | अर्ह पूजायां - प. प. लट् प्र. पु. ए. व.। |
| | | अर्हति अर्हतः अर्हन्ति। |
| बिभर्ति | - | भृञ् भरणे - प. प. लट् प्र. पु. ए. व.। |
| | | बिभर्ति बिभृतः बिभ्रति। |

**12. मखाश्च तत्प्रीतिकरा निवार्या**
**निवारणीया श्रुतिरग्रिमाऽपि।**
**तृणीकृताशेषजगत्प्रभावा**
**संस्तौति या तन्महिमानमेव।।**

श्रुतिः कुतः निवारणीया ?

**पदच्छेदः** - मखाश्च तत्प्रीतिकरा निवार्याः - मखाः + च + तत्प्रीतिकराः + निवार्याः।

श्रुतिरग्रिमापि - श्रुतिः + अग्रिमा + अपि।

| ***अन्वयः*** | ***अर्थः*** |
| --- | --- |
| तत्प्रीतिकराः मखाः च | - तस्य विष्णोः प्रियङ्कराः यागाः च |
| निवार्याः | - निवारयितुं योग्याः |
| या | - या श्रुतिः |
| तृणीकृताशेषजगत्प्रभावा | - सर्वस्यापि जगतः प्रभावं तृणवदनादृत्य |
| तन्महिमानम् एव | - तस्य विष्णोः महत्त्वमेव (सदा) |
| संस्तौति | - सम्यक् प्रशंसति च |
| (सा) अग्रिमा श्रुतिः अपि (सः) | - श्रेष्ठः वेदः च |
| निवारणीया | - निरोद्धव्यः। |

**सारः** - भवद्भिः तस्य विष्णोः प्रियङ्कराः यागाः रोद्धव्याः। (ते वेदोपनिषदादयः) सर्वस्यापि जगतः प्रभावं तृणवद् अनादृत्य विष्णोः महत्वम् एव ये कीर्तयते ते अपि निरोद्धव्याः।

**विग्रहः** -

| | |
| --- | --- |
| प्रीतिकराः | - प्रीतेः कराः। |
| तन्महिमानम् | - महतः भावः महिमा, तस्य महिमानम्। |
| तृणीकृताशेषजगत्प्रभावा | - अतृणं तृणं संपद्यमानः कृतः तृणीकृतः। तृणीकृतः अशेषजगत्प्रभावः यया सा तृणीकृताशेषजगत्प्रभावा। |
| अग्रिमा | - अग्रे भवा। |

**धातुपरिचयः**

संस्तौति - सं + ष्टुञ् स्तुतौ - लट् प. प. प्र. पु. ए. व.।
स्तौति स्तुतः स्तुवन्ति।

**प्रयोगविपरिणामः**

युष्माभिः मखाः निवार्याः। - कर्मणि।
यूयं मखान् निवारयेत। - कर्तरि।
युष्माभिः श्रुतिरपि निवारणीया। - कर्मणि।
यूयं श्रुतिमपि निवारयेत। - कर्तरि।

**13. गते विरामं गरुडध्वजेऽस्मि-**
**न्मखेषु सर्वत्र निवारितेषु।**
**सुरेषु सर्वेष्वपि दुर्बलेषु**
**हस्ते भविष्यत्यमरावती नः।।**

अमरावती कदा हस्ते भविष्यति ?

**पदच्छेदः** - गरुडध्वजेऽस्मिन्मखेषु - गरुडध्वजे + अस्मिन् + मखेषु।
सर्वेष्वपि - सर्वेषु + अपि।
भविष्यत्यमरावती - भविष्यति + अमरावती।

| ***अन्वयः*** | | ***अर्थः*** |
|---|---|---|
| सर्वत्र | - | सर्वेषु देशेषु |
| मखेषु | - | यज्ञेषु |
| निवारितेषु (सत्सु) | - | प्रतिषिद्धेषु (सत्सु) |
| अस्मिन् | - | अस्मान् हन्तुम् अवतीर्णे |
| गरुडध्वजे | - | विष्णौ |
| विरामं गते | - | विनष्टे सति |

| | | |
|---|---|---|
| सर्वेषु | - | अखिलेषु |
| सुरेपु अपि | - | देवेषु अपि |
| दुर्बलेषु (सत्सु) | - | क्षीणबलेषु सत्सु |
| अमरावती | - | इन्द्रपुरी |
| नः | - | अस्माकं |
| हस्ते भविष्यति | - | करे भविष्यति। |

**सारः** - सर्वस्मिन् देशे यज्ञेषु प्रतिषिद्धेषु सत्सु अस्मान् हन्तुम् अवतीर्णे विष्णौ विनष्टे सति, अखिलेषु देवेषु अपि क्षीणबलेषु सत्सु इन्द्रपुरी अस्मदधीना भविष्यति। (यज्ञो वै विष्णुः इति श्रुतिः)

**विग्रहः** - गरुडध्वजः - गरुडः ध्वजे यस्य सः गरुडध्वजः।

**व्याकरणविशेषः**

गरुडध्वजे विरामं गते - सति सप्तमी।

यदा गरुडध्वजः विरामं गतः, तदा।

मखेषु सर्वत्र निवारितेषु। सति सप्तमी।

यदा मखाः सर्वत्र निवारिताः तदा।

सुरेषु दुर्बलेषु। (सति सप्तमी) यदा सुराः दुर्बलाः तदा।

**14. इत्यूचुषस्तस्य पदोपकण्ठं**
**नीराजयन्तो मकुटप्रभाभिः।**
**अवादिषुर्विक्रमदर्पितास्ते**
**कृताट्टहासध्वनिकम्पिताशाः।।**

अमात्याः कथं प्रत्यवदन्?

**पदच्छेदः** - इत्यूचुषस्तस्य - इति + ऊचुषः + तस्य। ऊचिवस् इति क्वसु प्रत्ययान्तशब्दस्य षष्ठी एकवचनम्।

| | | |
|---|---|---|
| नीराजयन्तो मकुटप्रभाभिः | - | निर् + राजयन्तः + मकुटप्रभाभिः। निर् राजयन्तः 'रोरि' इति रेफलोपः 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति दीर्घः। |
| अवादिषुर्विक्रमदर्पितास्ते | - | अवादिषुः + विक्रमदर्पिताः + ते। |

| ***अन्वयः*** | | ***अर्थः*** |
|---|---|---|
| इति | - | इत्थम् |
| ऊचुषः तस्य | - | उक्तवतः तस्य कंसस्य |
| पदोपकण्ठम् | - | चरणसमीपम् |
| मकुटप्रभाभिः | - | रत्नखचितकिरीटानां कान्तिभिः |
| नीराजयन्तः | - | निश्शेषेण प्रकाशयन्तः |
| विक्रमदर्पिताः ते | - | स्वपराक्रमेण संजाताहङ्काराः ते प्रलम्बादयः |
| कृताट्टहासध्वनिकम्पिताशाः | - | कृतानाम् अट्टहासानां ध्वनिभिः दिगन्तान् कम्पयन्तः |
| अवादिषुः | - | उक्तवन्तः। |

**सारः** - एवम् उक्तवतः तस्य कंसस्य पादसमीपं नमस्कुर्वन्तः किरीटानां प्रभाभिः नितरां प्रकाशयन्तः स्वपराक्रमेण साहङ्काराः प्रलम्बादयः ते अट्टहासध्वनिना दिगन्तान् प्रकम्पयन्तः इत्थम् अवोचन्।

**विग्रहः** -

| | | |
|---|---|---|
| पदोपकण्ठम् | - | कण्ठस्य समीपम् उपकण्ठम्। पदस्य उपकण्ठम् |
| विक्रमदर्पिताः | - | दर्पः सञ्जातः एषामिति दर्पिताः, विक्रमेण दर्पिताः। |
| मकुटप्रभाभिः | - | मकुटानां प्रभाः मकुटप्रभाः, ताभिः। |

**धातुपरिचयः**

| | | |
|---|---|---|
| अवादिषुः | - | वद् व्यक्तायां वाचि - प. प. लुङ् प्र. पु. ब. व.। अवादीत् अवादिष्टाम् अवादिषुः। |

**15. किं चिन्तया पार्थिव! भुङ्क्ष्व भोगा-**
**नस्मासु जीवत्सु कुतो रिपुस्ते।**
**कथं मयूखेषु परिस्फुरत्सु**
**सरोजबन्धोस्तमसाऽभिभूतिः।।**

**पदच्छेदः** - रिपुस्ते - रिपुः + ते।
सरोजबन्धोस्तमसाभिभूतिः - सरोजबन्धोः + तमसा + अभिभूतिः।

| ***अन्वयः*** | | ***अर्थः*** |
|---|---|---|
| हे पार्थिव! | - | हे राजन्! |
| चिन्तया किम् | - | विचारेण किं प्रयोजनम्? |
| भोगान् भुङ्क्ष्व | - | यथेष्टं सुखम् अनुभव |
| अस्मासु | - | अस्मासु मन्त्रिप्रवरेषु |
| जीवत्सु (सत्सु) | - | प्राणान् धारयत्सु सत्सु |
| ते रिपुः कुतः! | - | तव शत्रुः कथं भवेत्! |
| मयूखेषु परिस्फुरत्सु (सत्सु) | - | रश्मिषु सर्वतः दीप्यमानेषु सत्सु |
| सरोजबन्धोः | - | सूर्यस्य |
| तमसा कथम् अभिभूतिः? | - | अन्धकारेण तिरस्कारः कथम् स्यात्! न कथमपि तिरस्कारो भविष्यति इत्यर्थः। |

**सारः** - हे राजन्! चिन्तया प्रयोजनं नास्ति। अतः यथेष्टं सुखमनुभव। यतः

अस्मासु मन्त्रिप्रवरेषु सप्राणेषु सत्सु तव शत्रुः कथं स्यात्? न कथमपि इति भावः। रश्मिषु सर्वतः दीप्यमानेषु सत्सु अन्धकारेण सूर्यस्य अभिभवः कथं भवेत्? (कथमपि न भवेत् इति भावः।)

**विग्रहः** - सरोजबन्धोः - सरसि जायते इति सरोजं, सरोजानां बन्धुः सरोजबन्धुःतस्य।

**अलङ्कारः** - दृष्टान्तः।

**धातुपरिचयः**

भुङ्क्ष्व - भुज् पालनाभ्यवहारयोः उभयपदी लोट् आ. प. म. पु. ए. व.।

**अत्र 'भुजोऽनवने' इति भुजो अवनभिन्नेऽर्थे आत्मनेपदम्।**

**भुङ्क्ष्व भुञ्जाथां भुङ्ध्वम्।**

**लट् भुङ्क्ते।**

**व्याकरणविशेषः**

अस्मासु जीवत्सु कुतो रिपुस्ते? - सति सप्तमी।

यदा वयं जीवामः तदा कुतः रिपुः ते?

मयूखेषु परिस्फुरत्सु सरोजबन्धोः तमसाऽभिभूतिः कथम्? - सति सप्तमी।

यदा मयूखाः परिस्फुरन्ति तदा सरोजबन्धोः तमसाऽभिभूतिः कथम्?

**16. अमातरिश्वानमहव्यवाह-**
**मसूर्यशीतांशुमवज्रपाणिम्।**
**अनच्युतेशानपितामहञ्च**
**द्रष्टासि राजन्नचिरेण लोकम्॥**

**पदच्छेदः** - राजन्नचिरेण - राजन् + अचिरेण।

| अन्वयः | | अर्थः |
|---|---|---|
| हे राजन्! | - | हे पार्थिव! |
| अचिरेण | - | विलम्बं विना |
| लोकम् | - | भुवनम् |
| अमातरिश्वानम् | - | वायुरहितम् |
| अहव्यवाहम् | - | अग्निरहितम् |
| असूर्यशीतांशुम् | - | सूर्यचन्द्ररहितम् |
| अवज्रपाणिम् | - | इन्द्ररहितम् |
| अनच्युतेशानपितामहं च | - | मूर्तित्रयरहितम् (विष्णुना शिवेन ब्रह्मणा च शून्यं) च |
| (त्वं) द्रष्टासि | - | (त्वं) द्रक्ष्यसि। |

**सारः** - हे राजन्! क्षिप्रमेव वायुरहितम्, अग्निरहितं सूर्यचन्द्ररहितम्, इन्द्ररहितं, तथा मूर्तित्रयरहितं च लोकं त्वं द्रक्ष्यसि। सर्वान् अपि वयं नाशयिष्यामः इत्याशयः।

**विग्रहः** -

अहव्यवाहम् - हव्यं वहतीति हव्यवाट्, अविद्यमानः हव्यवाट् यस्मिन् तम्।

अवज्रपाणिम् - वज्रं पाणौ यस्य सः वज्रपाणिः अविद्यमानः वज्रपाणिः यस्मिन्, तम्।

अनच्युतेशानपितामहम् - अच्युतः च ईशानः च पितामहः च अच्युतेशानपितामहाः। अविद्यमानाः अच्युतेशानपितामहाः यस्मिन्, तम् अनच्युतेशानपितामहम्।

राजन् अचिरेण राजन्नचिरेण।

**अत्र ङमो ह्रस्वादचि ङमुण्नित्यम् इति ङमुड् (नुट्) आगमः।**

अमातरिश्वानम् - न विद्यते मातरिश्वा (वायुः) यस्मिन् तम्।

**धातुपरिचयः**

द्रष्टासि - दृशिर् प्रेक्षणे - प. प. लुट् म. पु. ए. व.।
द्रष्टासि द्रष्टास्थः द्रष्टास्थ।
लट् पश्यति।

**17. इत्यूचुषस्तानुचितोपचारै-**
**स्संभाव्य कृत्येषु समादिदेश।**
**स देवकीमानकदुन्दुभिञ्च**
**विमोचयामास च बन्धनस्थौ।।**

**पदच्छेदः** - इत्यूचुषस्तानुचितोपचारैस्संभाव्य - इति + ऊचुषः + तान् + उचितोपचारैः + संभाव्य।
स देवकीमानकदुन्दुभिञ्च - सः + देवकीम् + आनकदुन्दुभिम् + च।

| ***अन्वयः*** | | ***अर्थः*** |
|---|---|---|
| सः | - | सः कंसः |
| इति ऊचुषः तान् | - | एवम् उक्तवतः प्रलम्बादीन् |
| उचितोपचारैः संभाव्य | - | योग्यैः सम्मानैः पूजयित्वा |
| कृत्येषु समादिदेश | - | कर्तव्यविषयेषु सम्यक् नियुक्तवान् |
| बन्धनस्थौ | - | बन्धने स्थितौ |
| देवकीम् आनकदुन्दुभिं च | - | देवकीं वसुदेवं च |
| विमोचयामास | - | अमोचयत्। |

**सारः** - सः कंसः एवम् उक्तवतः प्रलम्बादीन् मन्त्रिणः उचितैः सम्मानैः पूजयित्वा

कर्तव्यविषयेषु सम्यक् नियुक्तवान्। अथ बन्धने स्थितौ देवकीवसुदेवौ च अमोचयत्।

**विग्रहः** - बन्धनस्थौ - बन्धने तिष्ठतः इति बन्धनस्थौ।

उचितोपचारैः - उचिताश्च ते उपचाराः

उचितोपचाराः, तैः उचितोपचारैः।

**धातुपरिचयः**

समादिदेश - सम् + आ + दिश अतिसर्जने - प. प. लिट् प्र. पु. ए. व.।

समादिदेश समादिदिशतुः समादिदिशुः।

लट् समादिशति।

विमोचयामास- वि मुच मोक्षणे - णिच् प. प. लिट् प्र. पु. ए. व.।

विमोचयामास विमोचयामासतुः विमोचयामासुः।

लट् विमोचयति।

**सुबन्तपरिचयः**

ऊचुषुः - ऊचिवांसं ऊचिवांसौ ऊचुषः ।

## पठनप्रवर्तनानि।

❖ **श्लोकेभ्यः नूतनपदानि सञ्चित्य अर्थं लिखत।**

**श्रद्धेयाः अंशाः।**

- पाठ्यांशस्य वाचनेन नूतनपदानां चयनम्।
- कोशस्य साहाय्येन अर्थनिर्धारणम्।
- स्वकीये पदकोशे अकारादिक्रमेण सन्निवेशनम्।

- **श्लोकेभ्यः सन्धियुक्तपदानि विश्लेषयत।**

**श्रद्धेयाः अंशाः।**

- पाठ्यांशस्य वाचनेन नूतनसन्धियुक्तपदानां चयनम्।
- सन्धिविश्लेषणम्।
- स्वकीये सन्धियुक्तपदकोशे सन्निवेशनम्।

- **विग्रहवाक्यं लिखत।**

**श्रद्धेयाः अंशाः।**

- पाठ्यभागस्य वाचनेन नूतनसमस्तपदानां सञ्चयनम्।
- विग्रहवाक्यलेखनम्।
- अर्थज्ञानम् ।

- **श्लोकेभ्यः अव्ययानि सञ्चिनुत।**
- **सप्रकरणं व्याख्यात।**

1. महीयसः किं घटने परागः
   समीरणस्याभिमुखं प्रसर्तुम्।।

2. नखग्रलाव्यस्तरुरङ्कुरात्मा
   परश्वधस्यापि ततोऽतिभूमिः।।

3. कथं मयूखेषु परिस्फुरत्सु
   सरोजबन्धोस्तमसाभिभूतिः।।

- **पाठ्यांशं पठित्वा कंसस्य अमात्यान् प्रति वचनम् संगृह्य लिखत।**
- **पाठ्यांशं पठित्वा सचिवानां प्रतिवचनम् स्ववाक्यैः लिखत।**
- **कंसस्य समस्यानिवारणनैपुण्यम् अधिकृत्य चर्चाम् आयोजयत।टिप्पणीं च लिखत।**
- **पाठ्यांशात् कर्तरि कर्मणि प्रयोगान् चित्वा प्रयोगविपर्ययं कुरुत।**

**पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम्* | क्लेशनिर्देशः |
|---|---|---|---|---|
| 1. | नूतनपदानि चितानि | | | |
| 2. | संश्लिष्टपदानि चितानि | | | |
| 3. | समस्तपदानि चितानि | | | |
| 4. | अव्ययानि चितानि | | | |
| 5. | व्याख्यानं कृतम् | | | |
| 6. | उपन्यासः लिखितः | | | |
| 7. | चर्चां कृत्वा टिप्पणी च लिखिता | | | |
| 8. | प्रयोगविपर्ययं कृतम् | | | |

* भागिकतया कृतं चेत् कथं पूर्णं कृतम् इति संस्थया सूचयतु।

१. अध्यापकसाहाय्येन।

२. ग्रन्थसाहाय्येन।

३. छात्राणां साहाय्येन।

४. इतरेषां साहाय्येन।

# पठनाधिगमाः

सुभाषितानि जानाति तालयपूर्वकम् आलपति नूतनपदानि प्रत्यभिजानीते पदार्थान् विवेचयति सुभाषितस्याशयं जानाति पद्यस्य अन्वयं जानाति, लिखति च।

समानसुभाषितानि चिनोति।

संस्कृतकथाम् आख्यायिकां च परिचिनोति।

वाक्यपदघटनां जानाति।

कथाम् आस्वदते।

रामायणम् परिचिनोति।

काव्यस्वरूपं परिचिनोति।

आशयम् अवगच्छति, लिखति।

श्लोकानाम् अन्वयलेखनम्।

श्लोकम् आस्वदते।

सर्गात्मकरचनां करोति।

उपन्यासं वाचयति।

केरलीयसंस्कृतोपासकान् परिचिनोति।

टिप्पणीं लिखति।

दिनानि आचरति। तदधिकृत्य लघुविवरणं लिखति।

संस्कृतरूपकं नाटककारं भासं प्रत्यभिजानाति।

सन्धिं विश्लेषयति, पदानि सन्धत्ते, समस्तपदानि विगृह्य आशयं प्रकाशयति ।

नाटकलक्षणं नाटकसङ्केतान् गद्यरूपेण आस्वदते परिवर्तयति च।

पात्राभिनयं (role play) करोति।

चाटुश्लोकान् जानाति।

चाटुश्लोकान् व्याख्याति।

तालयानुसारं काव्यम् आलपति। वाक्यपदघटनां जानाति। खण्डान्वयरीत्या गद्यक्रमं जानाति। काव्यस्य आशयम् अवगच्छति। काव्यम् आस्वदते। केरलीयसंस्कृतसाहित्यसम्पत्तिं जानाति।

# अलङ्कारः।

काव्यशोभाकरान् धर्मान्
अलङ्कारान् प्रचक्षते।।

८

# अलङ्कारः।

'अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यम्' इति काव्यलक्षणमालङ्कारिकैः निर्दिष्टम्। उत्कर्षहेतवो गुणाः, अपकर्षहेतवो दोषाः, काव्यशोभाकराः धर्माः अलङ्काराः इति वक्तुं शक्यते। यथा कटककुण्डलकङ्कणादयोऽलङ्काराः शरीरस्य शोभामापादयन्ति तथा काव्यशरीरभूतयोः शब्दार्थयोः शोभाधायकाः अनुप्रासोपमादयः धर्माः अलङ्कारा इत्युच्यन्ते। एवञ्च शब्दरूपस्य शरीरस्य शोभाधायकाः शब्दालङ्काराः, अनुप्रासयमकादयः। अर्थरूपस्य शरीरस्य शोभाधायका अर्थालङ्कारा उपमोत्प्रेक्षादयः इति अलङ्कारा द्वेधा विभज्यन्ते। अर्थालङ्काराश्च सादृश्यमूलकाः अतिशयमूलकाः श्लेषमूलकाः स्वभावमूलका इति चतुर्विधाः भवन्ति। उपमादयः सादृश्यमूलकाः, अतिशयोक्त्यादयः अतिशयमूलकाः, श्लोषादयः श्लेषमूलकाः, स्वभावोक्त्यादयः स्वभावमूलकाश्च भवन्ति।

वर्ण्यस्य वस्तुनः सम्यगवबोधनाय अलङ्कारा उपकुर्वन्ति। अलङ्काराः सर्वदा चमत्कृतिजनका एव भवेयुः। सहृदयहृदयाह्लादजनकः काव्यनिष्ठो धर्म एव चमत्कृतिः (चमत्कारो वा)। अतः रामः कृष्ण इव सम्यगधीते इति वाक्ये रामस्य कृष्णेन सादृश्यस्य प्रतिपादनेऽपि नालङ्कारः। तत्रत्यं सादृश्यं न चमत्कृतिजनकम्।

वर्ण्यम्, उपमेयं, प्रकृतं, विषयः, प्रस्तुतम् इत्यादयः शब्दाः प्रायः अलङ्कारशास्त्रे समानार्थकाः प्रयुज्यन्ते। अपि च अवर्ण्यम्, उपमानम्, अप्रकृतं, विषयी (यि) अप्रस्तुतम् इत्येवमादयः समानार्थकाः। वर्णयितुं योग्यं वस्तु वर्ण्यम्। उपमातुं योग्यम् उपमेयम् अप्रसिद्धम्। येन उपमीयते तदुपमानम्, अप्रकृतं प्रसिद्धं वस्तु। अत्र उपमा, उत्प्रेक्षा, रूपकम्, उल्लेखः, प्रतीपः, अर्थान्तरन्यासः, दीपकं, स्वभावोक्तिश्चेति नवार्थालङ्काराः। अनुप्रासः, यमकम् इति शब्दालङ्कारौ च पाठ्यतया निर्दिष्टाः। उपमा सर्वालङ्कारबीजभूतेति आलङ्कारिका वदन्ति। अतः सैव आदौ प्रतिपाद्यते।

## १. उपमालङ्कारः

**लक्षणम् - "उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।"**

यत्र यस्मिन् काव्ये द्वयोः उपमानोपमेययोः वस्तुनोः सहृदयहृदयाह्लादजनकं सादृश्यं भाति सुव्यक्ततया प्रकाशते तत्र उपमालङ्कारः।

**उदाहरणम् - "हंसीव कृष्ण! ते कीर्तिः स्वर्गङ्गामवगाहते।।**

हे कृष्ण! ते कीर्तिः हंसी इव स्वर्गङ्गाम् अवगाहते प्रविशति इत्यर्थः। अत्र कीर्तिहंस्योः सादृश्यलक्ष्मीः स्पष्टं प्रकाशते इति उपमालङ्कारः।

उपमायाः चत्वारोऽवयवाः सन्ति। उपमानम्, उपमेयम्, साधारणधर्मः, उपमावाचकः चेति। तत्र उपमानं प्रसिद्धम् अधिकगुणयुक्तं चन्द्रादि। उपमेयं प्रकृते वर्ण्यमानं न्यूनगुणं मुखादि। शोभाह्लादकत्वादिकं साधारणो धर्मः। इवादिशब्दाः सादृश्यवाचकाः सादृश्यं च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्वम्। यथा चन्द्र इव मुखम् इत्यत्र मुखं चन्द्राद् भिन्नं तथापि चन्द्रगतभूयोधर्मवद् आह्लादकत्वाद्यनेकधर्मवद् भवति। उदाहरणे हंसी उपमानं, कीर्तिरुपमेयं, स्वर्गङ्गावगाहनं साधारणो धर्मः, इव शब्दः उपमावाचकः इति चतुर्णामप्युपादानात्पूर्णोपमा। एतेषां चतुर्णां मध्ये एकस्य द्वयोः त्रयाणां वा शब्दतः अनुपादानात् लुप्तोपमा च।

उदाः - तडिद्गौरी। तडिदिव गौरी इत्यर्थः। मेघश्यामः कृष्णः। मेघ इव श्यामः इत्यर्थः। उपमावाचकशब्दः लुप्तः। अतः लुप्तोपमा।

**वर्ण्योपमानधर्माणामुपमावाचकस्य च।**
**एकद्वित्र्यनुपादानैर्भिन्ना लुप्तोपमाष्टधा।।**

उपमानादीनां चतुर्णां मध्ये एकस्य द्वयोः त्रयाणां वा उपादानाभावे लुप्तोपमा। सा च अष्टधा यथा -

1. वाचकलुप्ता
2. धर्मलुप्ता
3. धर्मवाचकलुप्ता
4. वाचकोपमेयलुप्ता

5. उपमानलुप्ता 6. वाचकोपमानलुप्ता

7. धर्मोपमानलुप्ता 8. धर्मोपमानवाचकलुप्ता च।

**क्रमेणोदाहरणानि**

| | | |
|---|---|---|
| तडिदिव गौरी | तडिद्गौरी | वाचकलुप्ता |
| इन्दुतुल्यास्या | इत्यत्र | धर्मलुप्ता |
| कर्पूरन्ती | इत्यत्र | धर्मवाचकलुप्ता |
| कान्त्या स्मरवधूयन्ती | इत्यत्र | वाचकोपमेयलुप्ता |
| काकतालीयम् | इत्यत्र | उपमानलुप्ता, वाचकोपमानलुप्ता, धर्मोपमानलुप्ता, धर्मोपमानवाचकलुप्ता च। |

## २. उल्लेखालङ्कारः

**लक्षणम् -** **बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते।**

**उदा -** **स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः।।**

यत्र नानाविधधर्मयुक्तम् एकं वस्तु तत्तद्धर्मयोगरूपनिमित्तेनानेकेन अनेकधा उल्लिख्यते तत्र उल्लेखः। स्त्रीभिः इत्युदाहरणे एक एव राजा सौन्दर्यवितरणपराक्रमयोगात् स्त्रीभिः, अर्थिभिः शत्रुभिः च यथाक्रमं कामकल्पतरुकालरूपो दृष्टः इत्यतः उल्लेखः।

उल्लेखस्य भेदः

**एकेन बहुधोल्लेखोऽप्यसौ विषयभेदतः।**
**गुरुर्वचस्यर्जुनोऽयं कीर्तौ भीष्मः शरासने।।**

गृहीतृभेदाभावेऽपि विषयभेदात् बहुधा उल्लेखनात् असौ उल्लेखः। नृपस्य वचसि कीर्तौ शरप्रयोगे च बृहस्पत्यर्जुनभीष्माणामुल्लेखनात् उल्लेखः।

## ३. प्रतीपालङ्कारः

**लक्षणम् -** **प्रतीपमुपमानस्योपमेयत्वप्रकल्पनम्।**

**उदा -** **त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः।।**

प्रसिद्धस्य उपमानोपमेयभावस्य प्रातिलोम्यात् प्रतीपम्।

उदाहरणे लोचनपद्मयोः उपमेयोपमानभावेऽपि पद्मस्य उपमेयत्वप्रतीतिः। एवं विधुवक्त्रयोरपि । अतः प्रातिलोम्यकल्पनात् प्रतीपम्।

## ४. अर्थान्तरन्यासालङ्कारः

**लक्षणम् -** **उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः।**

**उदा -** **हनूमानब्धिमतरद्दुष्करं किं महात्मनाम्।।**

यत्र विशेषे प्रस्तुते तस्य समर्थनार्थम् अप्रस्तुतस्य सामान्यस्य कथनं, सामान्ये प्रस्तुते अस्य समर्थनार्थम् अप्रस्तुतस्य विशेषस्य च कथनं तत्र अर्थान्तरन्यासो नामालङ्कारः।

विशेषस्य सामान्येन समर्थनस्योदाहरणं - हनूमानिति, हनुमानब्धिम् अतरत् इति विशेषस्य समर्थनार्थं महात्मनां किं दुष्करं (भवति)? इति सामान्यस्य कथनम्। अब्धितरणं दुष्करं खलु तथापि हनुमतः महत्त्वकल्पनेन तत्साध्यमेवेति सूच्यते।

**सामान्यस्य विशेषेणसमर्थनस्य उदाहरणम् -**

**गुणवद्वस्तुसंसर्गाद् याति स्वल्पोऽपि गौरवम्।**
**पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते।।**

अत्र गुणवद्वस्तुना सह संसर्गात् स्वल्पः अपि गौरवं याति इति सामान्यस्य समर्थनार्थं पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते इति विशेषः उक्तः। अल्पजनवत् सूत्रस्य महत्त्वं नास्ति तथापि गुणवत्या पुष्पमालया अनुषङ्गात् गौरवं प्राप्नोति इत्याशयः।

## ५. रूपकालङ्कारः

**लक्षणम् -** **विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्।**
**रूपकं तत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः।।**

**उदा -** **अयं हि धूर्जटिः साक्षात् येन दग्धाः पुरः क्षणात्।**
**अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना।।**

विषयी - उपमानभूतं पद्मादि। विषयः तदुपमेयभूतं मुखादिः। विषयिणः रूपेण विषयस्य रञ्जनं रूपकम्; अन्यरूपेण रूपणात्। तच्च क्वचित् प्रसिद्धविषय्यभेदे पर्यवसितं क्वचित् भेदे प्रतीयमाने धर्मारोपमात्रे। अतः रूपकं द्विविधम्। अभेदरूपकं ताद्रूप्यरूपकञ्चेति।

अयं हि धूर्जटिः इत्यस्मिन् श्लोके अभेदरूपकम्। अस्याः मुखेन्दुना इत्यादिश्लोके ताद्रूप्यरूपकं च। येन क्षणात् पुरः दग्धाः साक्षात् धूर्जटिः (शिवः) हि अयम् इत्युदाहरणे वर्णनीये राज्ञि प्रसिद्धशिवाभेदरञ्जनात् अभेदरूपकम्।

अस्या मुखेन्दुना नेत्रानन्दे लब्धे इन्दुना किम् इत्युदाहरणे इन्दोः मुखेन ताद्रूप्यवर्णनात् ताद्रूप्यरूपकम्।

## ६. उत्प्रेक्षालङ्कारः

**लक्षणम् -** **सम्भावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना।**
**उक्तानुक्तास्पदाद्यत्र सिद्धासिद्धास्पदे परे।।**

अन्यधर्मसम्बन्धनिमित्तेनान्यस्यान्यतादात्म्यसम्भावनमुत्प्रेक्षा। सा च वस्तूत्प्रेक्षा, हेतूत्प्रेक्षा, फलोत्प्रेक्षेति त्रिविधा।

वस्तुनः वस्त्वन्तरतादात्म्यसम्भावना वस्तूत्प्रेक्षा। अहेतोः हेतुभावेन सम्भावना हेतूत्प्रेक्षा । एवम् अफलस्य फलवत्वेनोत्प्रेक्षा फलोत्प्रेक्षा च। अत्र आद्या वस्तूत्प्रेक्षा - उक्तविषया अनुक्तविषया चेति द्विधा, परे हेतुफलोत्प्रेक्षे सिद्धविषया असिद्धविषया चेति प्रत्येकं द्विविधे।

**उदाहरणं - वस्तूत्प्रेक्षा -**

**धूमस्तोमं तमः शङ्के कोकीविरहशुष्मणाम्।**
**लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।।**

अत्र पूर्वार्धः उक्तविषयस्य, उत्तरार्धः अनुक्तविषयस्य च उदाहरणे।

रजनीमुखे सर्वत्र प्रसृतस्य तमसः नीलत्वदृष्टिप्रतिरोधकत्वादि धर्मसम्बन्धेन गम्यमानेन निमित्तेन सद्यः प्रियविरहितकोकस्त्रीणां विरहानलधूमस्तोमतादात्म्यसम्भावनात् वस्तूत्प्रेक्षा, तमसः विषयस्य उपादानात् उक्तविषया च।

**लिम्पतीव इत्युदाहरणे अनुक्तविषया।**

तमोव्यापनस्य तमः कर्तृकाञ्जनवर्षणतादात्म्योत्प्रेक्षा अनुक्तविषया वस्तूत्प्रेक्षा।

**हेतूत्प्रेक्षायाः उदाहरणम्**

**रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद्ध्रुवम्।**
**त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी।। इति।**

अत्र पूर्वार्धः सिद्धविषयायाः उत्तरार्धश्चासिद्धविषयाया उदाहरणे । चरणयोः अरुणत्वे स्वतः सिद्धे वस्तुतः भुवि विक्षेपणं न हेतुः इति अहेतोः तस्य हेतुत्वेन सम्भावना हेतूत्प्रेक्षा, विक्षेपणस्य सत्त्वात् सिद्धविषया च।

चन्द्रस्य पद्मविरोधे स्वाभाविके नायिकावदनकान्तीच्छा न हेतुरिति तत्र अहेतोः हेतुत्वसम्भावना हेतूत्प्रेक्षा । वस्तुतः तदिच्छायाः अभावाद् असिद्धविषया।

**फलोत्प्रेक्षायाः उदाहरणम्।**

**मध्यः किं कुचयोर्धृत्यै बद्धः कनकदामभिः।**
**प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति।।**

अत्रापि पूर्वार्धः सिद्धविषयाया उत्तरार्धश्चासिद्धविषयाया उदाहरणे। मध्यः स्वयमेव कुचौ धरति, न तु कस्यापि बलात्। तथापि कनकदामबद्धत्वेनाध्यसितस्य वलित्रयस्य

बलात् मध्यः कुचौ धरति इति शङ्का। अतः अफलस्य फलवत्वेनोत्प्रेक्षा फलोत्प्रेक्षा सिद्धविषया च। अब्जस्य - जलजस्य - जलावस्थितिः स्वाभाविकी। तस्य कामिनीचरणसायूज्यप्राप्तिः न फलम्। एवं जलजस्य जलावस्थितेः तोये तपस्त्वेनाध्यवसितायाः तपः फलत्वेन कामिनीचरणसायूज्यं फलम् उत्प्रेक्षितमित्यतः असिद्धविषया फलोत्प्रेक्षा।

**उत्प्रेक्षाबोधकशब्दाः**

**मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः।**

**उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः।।**

## ७. दीपकालङ्कारः

**लक्षणम् -** **वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः।**

**उदा -** **मदेन भाति कलभः प्रतापेन महीपतिः।।**

यत्र प्रस्तुताप्रस्तुतयोः च एकधर्मान्वयः तत्र दीपकालङ्कारः।

उदाहरणे कलभः - गजः मदेन भाति, महीपतिः - राजा प्रतापेन भाति इति कलभमदराजप्रतापयोः प्रस्तुताप्रस्तुतयोः भानरूपैकधर्मे समन्वयः। अतः दीपकम्।

## ८. स्वभावोक्त्यलङ्कारः

**लक्षणम् -** **स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनम्।**

**उदा -** **कुरङ्गैरुत्तराङ्गाक्षैस्तब्धकर्णैरुदीक्ष्यते।।**

यत्र जात्यादिस्थस्य स्वभावस्य वर्णनं तत्र स्वभावोक्तिरलङ्कारः। उक्तोदाहरणे कुरङ्ग (हरिण) जातिस्वभाववर्णनं क्रियते। अतः स्वभावोक्त्यलङ्कारः।।

# शव्दालङ्काराः

यत्र अर्थातिरिक्ततया शब्दस्य प्राधान्यं वर्तते, तत्र शव्दालङ्काराः।

तादृशेषु अर्थस्य प्राधान्यं न्यूनं स्यात्। सः अनुप्रास - अन्त्यप्रास - यमक - चित्र - बिन्दुच्युतकादिभेदात् बहुधा वर्तते। तत्र अनुप्रासयमकयोः प्राधान्यम्। तौ हि काव्येषु अधिकतया प्रयुक्तौ।

## १. अनुप्रासः।

**लक्षणम् - अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्**

यस्मिन् पद्ये वर्णस्य आवर्त्तनम् भवति , तद् अनुप्रासयुक्तं पद्यं स्यात्।

उदाहरणम् :-

**अस्ति स्वस्त्ययनं समस्तजगतामभ्यस्तलक्ष्मीस्तनं**

**वस्तु ध्वस्तरजस्तमोभिरनिशं न्यस्तं पुरस्तादिव।**

**हस्तोदस्तगिरीन्द्रमस्तकतरुप्रस्तारिविस्तारित-**

**स्रस्तस्वस्तरुसूनसंस्तरलसत्प्रस्तावि राधास्तुतम्।।**

(श्रीकृष्णकर्णामृतम्।)

आत्र प्रतिपादं **'स्त'** इति वर्णस्य आवर्त्तनात् आनुप्रासः।

## २. यमकम्।

**लक्षणम् - सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।**
**क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते।।**

यस्मिन् पद्ये शब्दस्य शब्दानां वा अर्थभेदेन आवर्त्तनं तत्र स यमकम्।

उदाहरणम् :-

**नवपलाशपलाशवनं पुरः**
**स्फुटपरागपरागतपङ्कजम्।**
**मृदुलतान्तलतान्तमलोकयत्**
**ससुरभिं सुरभिं सुमनोभरैः।।**

*(माघम्)*

अस्मिन् श्लोके प्रथमपादे पलाश इति पदस्य द्वितीयपादे पराग इति पदस्य तृतीयपादे लतान्त इति पदस्य चतुर्थपादे सुरभिम् इति पदस्य च अर्थभेदेन आवर्त्तनात् यमकयुक्तमिदं पद्यम्।

## पठनप्रवर्तनानि।

- **चर्चाद्वारा प्रदत्तेषु काव्यांशेषु अलङ्कारं निर्णयत।**

  १ स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः।

  २ हनूमानब्धिमतरद्दुष्करं किं महात्मनाम्।

  ३ अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना।।

- **उपमा -उत्प्रेक्षा -अर्थान्तरन्यासालङ्काराणाम् उदाहरणान्तराणि पाठभागात् चित्वा लक्षणेन समन्वयत।**

- **वर्णनायाः वैचित्र्यमेव अलङ्कारवैविध्यस्य हेतुः- अस्मिन् विषये संगोष्ठीं चालयत।**

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः |
|---|---|---|---|---|
| 1. | अलङ्कारं निर्णीतम् | | | |
| 2. | उदाहरणानि चितानि | | | |
| 3. | सङ्गोष्ठी चालिता | | | |

*भागिकतया कृतं चेत् कथं पूर्णं कृतम् इति संस्थया सूचयतु।

१. अध्यापकसाहाय्येन।

२. ग्रन्थसाहाय्येन।

३. छात्राणां साहाय्येन।

४. इतरेषां साहाय्येन।

# वृत्तानि।

अपि माषं मषं कुर्यात्

छन्दोभङ्गं न कारयेत्।।

# ९

# वृत्तानि।

संस्कृते साहित्यरचनाः प्रायशः पद्यरूपेण भवन्ति इत्यतः छन्दःशास्त्रस्य अधिकं प्राधान्यमस्ति। वृत्तनिर्णयः छन्दोऽनुसारमेव भवति। मात्रावृत्तं वर्णवृत्तं चेति वृत्तानां द्वैविध्यम्। आर्यागीत्यादीनि मात्रावृत्तानि येषु मात्रानुसारं छन्दोबद्धतां कल्पयन्ति। इन्द्रवज्रादीनि वर्णवृत्तानि यत्र गुरुलघुभेदान् तथा अक्षरसंख्यां चाश्रित्य निर्णयः। वर्णवृत्तान्यपि समानि अर्धसमानि विषमाणि इति त्रिविधानि सन्ति। प्रतिपादं वर्णसंख्या समा चेत् समवृत्तम्। अयुजि युजि पादे च वर्णसंख्या भिद्यते चेत् अर्धसमवृत्तम्। चतुर्ष्वपि पादेषु अक्षरसंख्या विषमा (भिन्ना) चेत् विषमवृत्तम् इति व्यवस्था।

प्रतिपादम् एकस्मादक्षरादारभ्य षड्विंशतिपर्यन्तानि अक्षराणि भवेयुः। एवं विभिन्नानि छन्दांसि वर्तन्ते। षड्विंशतः ऊर्ध्वमक्षरसंख्या चेत् तद् दण्डकमिति व्यवह्रियते।

### लघुगुरुविवेकः

**ह्रस्वो लघुः।** यस्य अक्षरस्य / शब्दस्य उच्चारणाय एकमात्रात्मकं कालमपेक्षते स ह्रस्वः लघुः इति।

**दीर्घो गुरुः।** सानुस्वारः, सविसर्गः संयोगात्पूर्वः च ह्रस्वोऽपि उच्चारणाय मात्राधिकं कालमपेक्षते इति हेतोः ते ह्रस्वाः अपि गुरुत्वमर्जयन्ति।

गणविवेकः यथाः -

**आदिमध्यावसानेषु यरता यान्ति लाघवम्।**
**भजसा गौरवं यान्ति मनौ तु गुरुलाघवम्।।**

गुरुः (_) चिह्नेन, लघुः (∪) चिह्नेन च सूच्येते। एवं अष्टगणाः सिद्ध्यन्ति। ते च -

| | | |
|---|---|---|
| यगणः | यमादिः। | ∪ — — |
| रगणः | राजभिः। | — ∪ — |
| तगणः | ताम्राक्षि। | — — ∪ |
| भगणः | भ्रामय। | — ∪ ∪ |
| जगणः | जगाम। | ∪ — ∪ |
| सगणः | सततं। | ∪∪ — |
| मगणः | मन्दारः। | — — — |
| नगणः | नमति। | ∪∪∪ |

अत्र मात्रावृत्तेषु आर्या, समवृत्तेषु इन्द्रवज्रा उपेन्द्रवज्रा उपजातिः वंशस्थं, द्रुतविलम्बितम् तोटकं, वसन्ततिलकं तथा अनुष्टुप् च प्रतिपाद्यन्ते।

अर्धसमवृत्तेषु वियोगिनी च प्रतिपादिता।

## १. अनुष्टुप् (श्लोकः)

**लक्षणम्** - **"श्लोके षष्ठं गुरुर्ज्ञेयं सर्वत्र लघु पञ्चमम्।**
**द्विचतुष्पादयोः ह्रस्वं सप्तमं दीर्घमन्ययोः।।"**

सर्वेषु पादेषु पञ्चमवर्णः लघुः द्वितीयचतुर्थयोः पादयोः सप्तमवर्णेऽपि लघुः एव। सर्वेषु पादेषु षष्ठः वर्णः गुरुः च भवति। प्रथमे तृतीये च पादे सप्तमं दीर्घं च स्यात्। एवं प्रतिपादमष्टौ वर्णाः।

**उदाः** - **"वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।"**

उदाहरणे प्रथमपादे वागर्थाविव संपृक्तौ इत्यत्र पञ्चमषष्ठवर्णौ यथाक्रमं लघुगुरू भवतः। द्वितीयचतुर्थयोः पादयोः सप्तमवर्णोऽपि लघुः भवति। प्रथमतृतीयपादयोः सप्तमो वर्णः गुरुश्चेति श्लोकसंज्ञकोऽयं भवति।

## २. आर्या (मात्रावृत्तम्)

**लक्षणम् -** **यस्याः पादे प्रथमे**
**द्वादशमात्रास्तथा तृतीयेऽपि।**
**अष्टादशद्वितीये**
**चतुर्थके पञ्चदश सार्या।।**

यस्य पद्यस्य प्रथमतृतीयपादयोः (12) द्वादशमात्राः द्वितीये अष्टादशमात्राः तथा चतुर्थे पञ्चदशमात्राः च भवन्ति तस्य छन्दः आर्यानामकं वृत्तम्। अत्र लघुः '∪' इति चिह्नेन गुरुः '—' इति चिह्नेन च सूच्यते। लघुः एकमात्रात्मकः, गुरुः द्विमात्रात्मकः।

उदा -

∪∪∪ ∪∪ — ∪— —
सुलभ/ सलिला/वगाहाः (12 मात्राः)

—∪∪ — —∪∪∪∪ ∪∪— —
पाटल/संसर्ग/सुरभि/वनवा/ताः। (18 मात्राः)

— —∪ ∪∪∪ — —
प्रच्छाय/ सुलभ/निद्राः (12 मात्राः)

∪∪— ∪∪ — ∪∪∪ — —
दिवसाः/ परिणा/मरम/णीयाः।। (15 मात्राः)

## ३. इन्द्रवज्रा (त्रिष्टुप्छन्दः)

**लक्षणम् -** **स्यादिन्द्रवज्रा यदि तौ जगौ गः।**

यदि तौ (तगणद्वयं) जगौ जगणः गुरुश्च च क्रमशः स्यात् तदा इन्द्रवज्रा नाम वृत्तम्। पादान्ते यतिः।

**उदाः -** त त ज गु गु

— — U — — U U— U — —

अर्थो हि/ कन्या प/ रकीय/ एव
तामद्य सम्प्रेष्य परिग्रहीतुः।
जातो ममायं विषदः प्रकामम्
प्रत्यर्पितन्यास इवान्तरात्मा।। (अभिज्ञानशाकुन्तलम्)

अत्र तगण- तगण- जगणाः गरूः इति क्रमशः भवन्ति इत्यतः इन्द्रवज्रा। प्रथमपादे एव इत्यत्र वकारः वा पादान्ते - इति नियमेन गुरुः।

## ४. उपेन्द्रवज्रा (त्रिष्टुप्छन्दः)

**लक्षणम्** **उपेन्द्रव्रा जतजास्ततो गौ।**

जतजाः (जगण तगण जगणाः) ततः गौ (गुरू) च यदि भवेयुः तदा उपेन्द्रवज्रा स्यात्।

उदा - ज त ज गु गु

U— U — —U U—U — —

अलं म/ हीपाल/ तवश्र/ मेण
प्रयुक्तमप्यस्त्रमितो वृथा स्यात्।
न पादपोन्मूलनशक्ति रंह;
शिलोच्चये मूर्च्छति मारुतस्य।।

(रघुवंशम्)

अत्र उक्तलक्षणस्य सत्वाद् उपेन्द्रवज्रा। चतुर्ष्वपि पादेषु लक्षणं समानमेव।

## ५. उपजातिः (त्रिष्टुप्छन्दः)

**लक्षणम् -** **अनन्तरोदीरितलक्ष्मभाजौ**
**पादौ यदीयावुपजातयस्ताः ।।**

इन्द्रवज्रोपेन्द्रवज्रयोः पादसङ्कलनेन उपजातिवृत्तं जायते। इन्द्रवंशावंशस्थयोः सङ्कलनमपि एवमेवेति केचित्।

उदा -

त त ज गु गु
— —U — — U U—U — —
सञ्चार/ पूतानि/ दिगन्त/ राणि

त त ज गु गु
— — U — — U U—U — —
कृत्वा दि/ नान्ते नि/ लयाय/ गन्तुम्।

ज त ज गु गु
U—U— —U U—U — —
प्रचक्र/मे पल्ल/ वराग/ ताम्रा

ज त ज गु गु
U—U — — U U—U — —
प्रभाप/ तङ्गस्य/ मुनेश्च/ धेनुः।। (रघुवंशम्)

अत्र प्रथमद्वितीययोः पादयोः इन्द्रवज्रायाः तृतीयचतुर्थयोः पादयोः उपेन्द्रवज्रायाः च लक्षणस्य समन्वयात् उपजाति वृत्तम्।

वस्तुतः एतादृशस्य श्लोकस्य प्रथमवर्णावगमनेनैव इन्द्रवज्रायाः उपेन्द्रवज्रायाः वा लक्षणसमन्वयः इत्यवगम्यते। पादे प्रथमवर्णस्य गुरुत्वे इन्द्रवज्रा लाघवे उपेन्द्रवज्रा इति।

## ६. द्रुतविलम्बितम् (जगतीच्छन्दः)

**लक्षणम् -** **द्रुतविलम्बितमाह नभौ भरौ।**

**प्रतिपादं नभौ (नगण - भगणौ) भरौ (भगणरगणौ)**

क्रमशः चेत् द्रुतविलम्बितम् (तन्नामकं वृत्तम्) आह (कथयति)।

उदा - न भ भ र

UUU —UU—UU —U—

शशिदि/ वाकर/ योर्ग्रह/ पीडनं
गजभुजङ्गविहङ्गमबन्धनम्।
मतिमताञ्च विलोक्य दरिद्रतां
विधिरहो बलवानिति मे मतिः।। (भर्तृहरिः)

अत्र उक्तलक्षणस्य समन्वयात् द्रुतविलम्बितं नाम वृत्तम्।

## ७. तोटकम्।(जगतीच्छन्दः)

**लक्षणम् -** **इह तोटकमम्बुधिसैर्कथितम्।**

(पाठान्तरम् - **वद तोटकमब्धिसकारयुतम्**।)

यत्र चतुर्ष्वपि पादेषु चत्वारो सगणाः सन्ति, तत्र तोटकनाम वृत्तं भवति।

उदाहरणम् -

स स स स

UU — UU — UU — UU —

अथ वारिणि घोरतरं फणिनं
प्रतिवारयितुं कृतधीर्भगवन्।
द्रुतमारिथ तीरगनीपतरुम्
विषमारुतशोषितपर्णचयम्।।

अत्र प्रतिपादं चतुस्सगणयुक्तत्वात् तोटकं नाम वृत्तम्। द्वादशाक्षरात्मकमिदं पद्यम्।

## ८. वसन्ततिलका (शक्वरीच्छन्दः)

**लक्षणम् - उक्ता वसन्ततिलका तभजाः जगौ गः।।**

प्रतिपादं तभजाः (तगणभगणजगणाः) जगौ (जगणगुरू) गः (गुरुः) च भवन्ति चेत् वसन्ततिलका (तन्नामकं वृत्तम्) कथिता।

उदा - त भ ज ज गु गु

— — U —U U U— U U—U — —

चित्रे नि/ वेश्य प/ रिकल्पि/ तसत्व/ यो/ गा,
रुपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्नसृष्टिरपरा, प्रतिभाति सा मे,

धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः।।

(अभिज्ञानशाकुन्तलम्)

अत्र उक्तलक्षणस्य समन्वयात् वसन्ततिलका।

## ९. मन्दाक्रान्ता (अत्यष्टिच्छन्दः)

**लक्षणम् - मन्दाक्रान्ताम्बुधिरसनगैर्मोभनौ तौगयुग्मम्।**

मो (मगणः) भनौ (भगणनगणौ) तौ (तगणद्वयम्) गयुग्मं (गुरुद्वयं च) क्रमशः तथा अम्बुधिभिः (चतुर्भिः) रसैः (षड्भिः) नगैः (सप्तभिश्च) वर्णैः यतिः च भवन्ति चेत् मन्दाक्रान्ता नाम वृत्तम्।

उदा - म भ न त त गु गु

— — — —UU UUU — —U — — — — —

कश्चित्का/ न्ताविर/ हगुरु/ णास्वाधि/ कारात्प्र/ म त्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः।

यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु।।

(मेघदूतम्)

## अर्धसमवृत्तप्रकरणम्।

एतादृशवृत्तयुक्तेषु पद्येषु प्रथमतृतीयपादयोः गणव्यवस्था समाना भवेत्। ततो भिन्ना गणव्यवस्था स्यात् द्वितीयचतुर्थपादयोः। वियोगिनी , पुष्पिताग्रा, अपरवक्त्रा आदयो अस्मिन् अन्तर्भवन्ति। दिङ्मात्रदर्शनाय वियोगिनीं पठामः।

### १०. वियोगिनी

अस्याः सुन्दरी इति नामान्तरमस्ति।

**लक्षणम् -**

**विषमे ससजाः गुरुः समे**
**सभरालोऽथ गुरुर्वियोगिनी।।**

अस्याः प्रथमतृतीयपादयोः सगण सगण जगणः गुरु स्यात्। तथा द्वितीयचतुर्थयोस्तु सगण- भगण- रगण- लघु - गुरवः स्युः ।

**उदाहरणम्-**

स स ज गु
UU — UU — U— U —
**मरणं प्रकृतिश्शरीरिणां**
स भ र ल गु
UU — —UU — U —U —
**विकृतिर्जीवितमुच्यते बुधैः।**
**क्षणमप्यवतिष्ठते श्वसन्**
**यदि जन्तुर्ननु लाभवानसौ।।** (रघुवंशम्)

अत्र प्रथमतृतीयपादयोः गणव्यवस्था - सगण- सगण - जगणा - गुरुश्च। ततो भिन्ना द्वितीयचतुष्कयोः गणव्यवस्था। तयोस्तु सगण- भगण - रगण-लघु - गुरवः भवन्ति। एवं इदं अर्धसमवृत्तं वियोगिनी।

## पठनप्रवर्तनानि।

- **चर्चाद्वारा प्रदत्तेषु काव्यांशेषु वृत्तं निर्णयत।**
- **वृत्तलक्षणं लिखत। उदाहरणे योजयत।**

**श्रद्धेयाः अंशाः**

- पाठभागवाचनम्।
- चर्चा।
- लक्षणलेखनम्।
- उदाहरणे योजनम्।

- **त्र्यक्षरपदानि यावच्छक्यं सञ्चिनुत। तानि कस्मिन् गणे अन्तर्भवन्तीति विवेचयत।**
- **पाठभागात् कमपि श्लोकं चित्वा वृत्तं निश्चिनुत। अधः प्रदत्तेषु कस्य आलापभेदः इति विविच्य लिखत।**

१ तदनु नन्दममन्दशुभास्पदम्।
२ श्रियः कुरूणामधिपस्य पालिनीम्।
३ अजामिलो नाम महीसुरः पुरा।

पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम्* | क्लेशनिर्देशः |
|---|---|---|---|---|
| 1. | गणविवेचनम् कृतम् | | | |
| 2 | आलापभेदयुक्तः श्लोकः प्रत्यभिज्ञातः | | | |

*भागिकतया कृतं चेत् कथं पूर्णं कृतम् इति संस्थया सूचयतु।

१. अध्यापकसाहाय्येन।

२. ग्रन्थसाहाय्येन।

३. छात्राणां साहाय्येन।

४. इतरेषां साहाय्येन।

## पठनाधिगमाः

| अलङ्कारः | वृत्तम् |
|---|---|
| अलङ्कारप्रयोगान् जानाति। | गुरुलघुव्यवस्थां परिचिनोति। |
| अलङ्कारलक्षणं जानाति। | गणव्यवस्थां परिचिनोति। |
| अलङ्कारप्रभेदान् शब्दालङ्कार - अर्थालङ्कारभेदान् परिचिनोति। | वृत्तलक्षणं जानाति। |
| अलङ्कारान् सलक्षणं सोदाहरणं परिचिनोति। | वृत्तभेदान् प्रत्यभिजानाति। |
| | वृत्तनियमान् जानाति। |
| | यति (विराम) परिचयः। |

अनुबन्धम्

# ഹനൂമത്സീതാസമാഗമം

**– രാമായണം സുന്ദരകാണ്ഡം**

1. അനന്തരം, മലിനവസ്ത്രം ധരിച്ചവളും രാക്ഷസസ്ത്രീകളാൽ ചുറ്റപ്പെട്ടവളും ഉപവാസംകൊണ്ട് ക്ഷീണിച്ചവളും ദുഃഖിതയും വീണ്ടും വീണ്ടും നെടുവീർപ്പിടുന്നവളുമായ സീതയെ കണ്ടു.

2. കണ്ണുനീർകൊണ്ട് നിറഞ്ഞ മുഖത്തോടുകൂടിയവളും ദുഃഖിതയും ഭക്ഷണമില്ലായ്കയാൽ ക്ഷീണിച്ചവളും ദുഃഖം നിമിത്തം പലതരം ചിന്തയിൽ ഏർപ്പെട്ടവളും ദുഃഖപരാധീനയുമായ സീതയെ കണ്ടു.

3. ഹനുമാൻ ആടയാഭരണങ്ങൾ ഇല്ലാത്തവളായ സീതയെ പ്രകൃതി പ്രത്യയാദി സംസ്കാരമില്ലാത്ത വാക്ക് എന്നപോലെ ഏറെ ക്ലേശിച്ച് അറിഞ്ഞു.

4. വായുപുത്രനായ ഹനുമാൻ ഇത്തരത്തിലുള്ള സീതയെ കണ്ടു, സന്തോഷിച്ച് മനസ്സുകൊണ്ട് രാമനെ സമീപിച്ച് അദ്ദേഹത്തെ പ്രശംസിച്ചു.

5. ശോകംകൊണ്ട് പീഡിതയും കോപംകൊണ്ട് വിവേകം നഷ്ടപ്പെട്ടവളും നെടുവീർപ്പിടുന്നവളുമായ സീത ദുഃഖിതയായി വിലപിച്ചു.

6. പരാക്രമിയായ ഹനുമാൻ ത്രിജടയുടെയും സീതയുടെയും വാക്കുകളും രാക്ഷസികളുടെ ഭീഷണികളും വേണ്ടപോലെ ഗ്രഹിച്ചു.

7. ഇക്ഷ്വാകുരാജാക്കന്മാരിൽ ശ്രേഷ്ഠനും സർവ്വവിദിതനുമായ രാമന്റെ ശുഭങ്ങളും ധർമ്മയുക്തങ്ങളായ വാക്കുകൾ മധുരമായി കേൾപ്പിക്കാം.

8. രഥം, ആന, കുതിര എന്നിവയോടുകൂടിയവനും പുണ്യശീലനും പരമയശസ്കനും കീർത്തിമാനുമായ ദശരഥൻ എന്ന രാജാവുണ്ട്.

9. അദ്ദേഹത്തിന്റെ ജ്യേഷ്ഠപുത്രനും ചന്ദ്രനുതുല്യമായ ശോഭയോടുകൂടിയ മുഖമുള്ളവനും വില്ലാളിമാരിൽ ശ്രേഷ്ഠനും എല്ലാ വിശേഷണങ്ങളും അറിയുന്നവനുമായ രാമനെന്ന കുമാരൻ ഉണ്ട്.

10. ഈ വാക്കുകൾ കേട്ട സീത വിനയാന്വിതനും പ്രിയവാദിയും വികസിച്ച അശോകപൂങ്കുലപോലെ തിളങ്ങുന്നവനും നല്ലവണ്ണം ചുട്ടുപഴുത്ത സ്വർണ്ണത്തെപ്പോലെ തിളങ്ങുന്ന കണ്ണുകളോടുകൂടിയവനുമായ വാനരനെ കണ്ടു.

11. ശ്രീരാമകീർത്തനംകൊണ്ട് സന്തുഷ്ടയായ ആ വിദേഹപുത്രിയായ സീത, ഹനുമാന്റെ വാക്കു കേട്ട് മരത്തെ ആശ്രയിച്ച് നിന്ന അദ്ദേഹത്തോട് ഇങ്ങനെ പറഞ്ഞു.

12. ആ ദുഷ്ടനായ രാവണൻ രണ്ട് മാസക്കാലം ജീവിതാനുഗ്രഹം നൽകിയിട്ടു ണ്ട്. രണ്ട് മാസങ്ങൾക്ക്ശേഷം ഞാൻ ജീവിതം ഉപേക്ഷിക്കും.

13. സീതയുടെ ആ വാക്കുകേട്ട് കപിശ്രേഷ്ഠനായ ഹനുമാൻ ദുഃഖത്തിൽ നിന്നും ദുഃഖത്തിലേക്ക് വഴുതിവീണ സീതയെ സമാശ്വസിപ്പിച്ചുകൊണ്ട് പറഞ്ഞു.

14. ഹേ ദേവി! ഞാൻ നിനക്ക് രാമന്റെ സന്ദേശം കൊണ്ട് വന്നിരിക്കുകയാണ്. അല്ലയോ വൈദേഹി! രാമൻ സുഖമായിരിക്കുന്നു. അദ്ദേഹം നിന്റെ കുശ ലവൃത്താന്തം അന്വേഷിക്കുന്നു.

15. മഹാതേജസ്വിയും നിന്റെ ഭർത്താവിന്റെ പ്രിയപ്പെട്ട അനുചരനുമായ ലക്ഷ്മ ണനും ദുഃഖിതനായി തന്റെ ശിരസ്സ് നമിച്ച് നിന്നെ അഭിവാദനം ചെയ്യുന്നു.

16. ആ നരശ്രേഷ്ഠന്മാരായ രാമലക്ഷ്മണന്മാരുടെ കുശലവൃത്താന്തം കേട്ടിട്ട് അത്യന്തം സന്തോഷത്തോടുകൂടിയ ശരീരത്തോടെ ഹനുമാനോട് ഇപ്രകാരം പറഞ്ഞു.

17. നിന്റെ ഈ സ്തുതി (ഗീതം) മംഗളകരമായി എനിക്ക് തോന്നുന്നു. ഇത്തരം ആനന്ദം മനുഷ്യരെ അനേകസംവത്സരംവരെ ജീവിക്കാൻ പ്രേരിപ്പിക്കും.

18. മാരുതാത്മജനായ ഹനുമാൻ സീതയുടെ വ്യസനം കേട്ട് ശോകംകൊണ്ട് തപിച്ചിരിക്കുന്ന സീതയുടെ അടുത്തേക്ക് നീങ്ങി.

# अनुबन्धः ।

## भाससूक्तयः

भासनाटकचक्रात् समाकलिताः काश्चन प्रसिद्धाः सूक्तयः अधो दत्ताः।

- चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः। (स्वप्नवासवदत्तम्)
- हतेषु देहेषु गुणाः धरन्ते। (कर्णभारम्)
- माता किल मनुष्याणां दैवतानां च दैवतम्। (मध्यमव्यायोगः)
- कालदेशावस्थापेक्षि खलु शौर्यं नयानुगामिनाम्। (दूतवाक्यम्)
- सम्बन्धो बन्धुभिः श्रेयान् लोकयोरुभयोरपि।। (दूतवाक्यम्)
- बहुवृत्तान्तानि राजकुलानि नाम। (प्रतिमानाटकम्)
- सुखं हि दुःखान्यनुभूय शोभते। (दरिद्रचारुदत्तम्)
- काष्ठादग्निर्जायते मथ्यमानात्<br>भूमिस्तोयं खन्यमाना ददाति।<br>सोत्साहानां नास्त्यसाध्यं नराणां<br>मार्गारब्धाः सर्वयत्नाः फलन्ति।। (प्रतिज्ञायौगन्धरायणम्)

पूर्णमदः पूर्णमिदम् ।
पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय
पूर्णमेवावशिष्यते ।।